द्वया। तलः स्विधांतासे दिग्धयेक्षपालकिमोनराः। तत्तु वैशंपायनसंहितायां। कृत्वा मनु जपं मंत्री पुर १९

स्वाहायसंयुतः। दशांशं जुहुयाद्वह्नौ यथोक्तविधिना ततः। क्रमदीपिकायां। दशलक्षमस्य फलम
दमसुंप्रलिजप्य शिक्षितैर्मिलितैर्दशांशं जुहुयात्कुडाज्यमधुसंयुतैर्नवैररुणैः सरोरुहैः। लक्षदशांशं
शांशायुतमित्ययत्तु तत्रैवोक्तं। कुलाशिहां जोमीति। तान्वित्यस्मायां पृथंहोमविषयं ग्रात्मपि
कं दशांशहोमविषयं चेति सर्वसंजसमिति। कश्चित्तु प्रत्यक्षं जपदशांशहोमं तर्पणं मार्जनं चकारो
तिक्क। यत्तु लक्षस्वर्णकरोतिनावपि सांप्रदायिकावेव। तदुक्तं नारदीये। जपस्यतु दशांशहो
मः कार्यो दिने दिने। अथवा लक्षपर्यंते होमः कार्यो विपश्चितैरिति। अनंतरं दशांशतर्पणं दशां
शमार्जनं कुर्यात्। यथा। मंत्रमुच्चार्य तर्पणीयमंत्रदेवतायाग्नामथैवं द्वितीयांतमुच्चार्य तर्पया
मीति पदं योज्यं तेषु नामसु मंत्रेण द्वितीयांतेषु च पुनः स्वाहांतोयं समापयेत्। उक्तं च सारदातिलके।
जलेनांजलिनातोयेन तर्पणं तर्पणं इति। उक्तं चिंतामणिकायां। विधयात्तर्पयेद्देवीं दशांशेनापि साध
कः इति। अनंतरं मार्जनं अनमोंतमपि मंत्रं नमोंतमुच्चार्य देवतात्मकत्वेन ध्यातस्यात्मनो मूर्ध्नि
अंजलि जलमस्तके काल्मकमभिषेकं कुर्यात्। तदुक्तं चिंतामणिकायां। अभिषिंचात्मयत्नेन तथै
व स्वनमोंतयेति। जपकाले तु देवताचिंतनं दशांशमेव दशांशेनैव विधयाद्देवतां चिंतयेद्दपीतिशाका

स्वरसात्। न्यूनाधिकयोर्निषेधः। अत एवदेवतायाः स्मरणोर्ध्वपटादौ लिखितं कुर्यात्। एवं पुरश्चरणं
कृत्वा गुरुं देवता यां अग्निं च वित्तादिना संतुष्य मयतन्त्रविधानं जपेत्। एतत्कर्म परिसमाप्तौ ब्राह्मणान् भो
जयित्वा कथितान्यन्यान्यपि प्रयोजनानि साधयेत्॥ ॥इति श्रीमत्तीरभुक्तीय देशीय महाकर मञ्जु
रसरोज भृङ्ग श्री रविकर विरचितां पुरश्चरण पद्धतिमाला समाप्ता।७॥ अथ दीपस्थान चक्रं॥ ॥

ह्रां ह्रः जयाख्येच पाल	कखगघङ· वृषभक्षेत्रपाल	चछजझञ हल्लराजक्षेत्र पाल
शषसह महाराध्ये	अआइईउऊ ऋॠऌॡएऐओऔ अंअः भूतक्षे त्रपाल	टठडढण वासुकीक्षेत्रपाल
यरलव पद्मयोनिक्षे त्रपाल	पफबभम शक्तिपुरक्षे त्रपाल	तथदधन अर्थकरक्षेत्र पाल

तदुक्तं च। रत्नाकरे मन्त्रखण्डे। शास्त्राद्वा गुरुवक्त्राद्वा यो
वै साधयेत्पुनः पुरश्चपत्तनेयाम्येखेटके सिंधुसंगमे वनेवोप
वने तीर्थे महापीठ्यसागरे पर्वते सिद्धक्षेत्रे कुरुक्षेत्रे महाश्मशा
नके। गुहामात्रगृहारण्ये क्षेत्रे वा यमहाद्रेः। सिद्धक्षेत्रेषु नक्षत्रा
ने गृह्वे वा यथायोदितो दीपस्थानं विनिश्चित्य कर्म चक्रे तु सिद्धिदे।
अष्टाविंशति रेखाभिर्भानस्मध्यातोयावद्वतरं। क्षेमा शानपदे क्षेत्रे वै
दाश्वनवकोष्ठके। रुद्रास्यनुत्क्रमं पूर्वे पुष्टेवर्ग क्रमं क्षितिः। २०
क्षेत्रपालान् वै वेत्युद्धापानिनवकोष्ठकः। अनलं वृषभं हल्लराजं वासुकी। अर्थकर। शक्तिपुर। पद्म

योनि। महाराध्य। जयाख्य। गणान वा मध्यासर्वे दिताः स्यामंत्रोपलेन कथ्यते। अमुकक्षेत्रपाल
देवीपुत्र अवतर २ अतिबलिपिपिशितंगृह्ण २ स्वर २ स्वर २ स्वर २ यर २ नवक्षेत्रपालस्स सर्वविघ्नान् हन हन स्वाहा।
अनेन मंत्रेण सर्वक्षेत्रपालाः स्वस्याः पवयस्त्रन वेद्यक्षेत्रनामाघमक्षरं। तन्मुखं शेषवर्गे षु कर
कुर्यात्क्रिकस्यता। मुखस्थः सुतक्षन्मंत्र कर स्थः सुस्मनोगमतं। कुक्षिस्थो विप्रुदासीनः पादस्थो दुः
खमाप्नुयात्। पुच्छस्थितो वध बंधं जपाद्याप्नोति निश्चितं। दीपस्थानं तलं क्षेत्रे कृत्वा मंत्रं सु विनिर्जपेत्।
त्र। क्षेत्र साधक मंत्राणां एकमेवाघमक्षरं। यदि स्यात्सप्रदं मंत्रं त्वितमेव प्रसिध्यति। ॥इति दीपचक्रं।
इति श्रीनेग· आचारनियमदीपस्थाननिर्णयनाम अष्टम प्रकाशः॥८॥ ॥अथासननिर्णयः।
मंत्रखण्डे। शान्तिपौष्टिके पद्मासनं। आरूढो पार्श्विके स्येयं विद्वेषे कुक्कुटासनं। अर्धस्वस्तिकमु
च्चाटे कर्तोपाद्यं मारणे। यथोक्तासमारूढो जपं मंत्री समाचरेत्। कुशाजिनाम्बरे मुक्तौ व्याघ्र
गुल्मस्तले। वस्त्रे दुःखं दारिद्र्यं तु सुदृढं पृष्ठ निर्मितं। तच्चोपरि निषण्णो तथा योग मंत्रस्य सिद्धये॥ न
वदत्सुगच्छन् नान्यमात्रं पंकमपि स्मरन्। सुवक्त्रं नणाद्विकादि विकल्पो हीनमानसः। मंत्रं सिद्धिश्च वा
ग्रोनित्य स्याघत्ल परोप्य वेत्। व्याघ्रचर्मा जिनं रुद्रमोक्षे वा धनसाधने। आरूढोर्थं घदिद्रां स्यात्तद्धरि

णां शांतिपौष्टिके। तथा चोक्तं शारदातिलके। स्तंभने गजचर्मैव मारणे माहिषं तथा। मेषीचर्मणि चोच्चा
टे खङ्गं च वश्यकर्मणि। विद्वेषे जंबुकं चैव गोचर्म स्यात्तु शांतिके। वंशासने दरिद्रं स्यात्पाषाणे व्याधिसं
कुलं। धरिण्यां दुःखसंभूतिर्दौर्भाग्यं दारुजासने। तृणासने यशोहानिः पल्लवे चित्तविभ्रमः। कुशा
जिने ज्ञानसिद्धिर्ज्ञानार्थे मोक्षकर्मणि। वस्त्रासने रोगनाशः चित्रकं विहारं श्रियै। पौष्टिके चैव कौशे
यं कंबलं तु दुःखमोचनं। ॥इत्यासननिर्णयः॥ ॥अथ कालनिर्णयः॥ तदुक्तं मंत्रखंडे। उदयाद्या
मपर्यंतं हेमंते पौष्टिकं जपेत्। यामद्वयं पूर्वरात्रे शिशिरे मारणं जपेत्। वसंते प्रहरादूर्ध्वं यावन्मध्या
ह्नकं च वश्यं। कार्यमाकर्षणं यत्नं मंत्रैरिष्टास्पदं स्तुतं। ग्रीष्मे च तृतीये यामे हितो वै द्वेषकर्मणि। न
तोल्लमनपर्यंतमुच्चाटं तोयदागमे। सार्द्धरात्रे निशांते च जपेच्छारदि शांतिके। ७। तथा चोक्तं योग
रत्नावल्यां। दिनादियामिनीप्रांतस्थलवत्षड्ऋतवस्थिता। शिशिराद्याः समाक्रम्य नाडी द्वादश क्र
मात्। आरक्तधवलो बालः शिशिरो वश्यकर्मणि। उच्चाटने च विज्ञेयो वसंतो लोहितो युवा। ग्रीष्मो
धूम्रशरीरस्तु मारणे जलदागमः। श्यामांगः स्तंभने कृष्णः शरद्वा पौष्टिकर्मणि। हेमंतो धवलो वृद्धः २९
शांतिवश्यादिकर्मसु॥ ॥इति कालनिर्णयः॥ ॥अथ दिङ्निर्णयः॥ तदुक्तं ग्रंथांतरे। ईशासि:

स्तंभने वश्ये अग्नावाकर्षणे योगयोः। मारणे दक्षिणा स्यात्तु नैर्ऋते द्वेषणे तथा। शांतिके पश्चिमा स्येन वा
यौ तत्वोच्चाटने। पौष्टिके चोत्तरा स्यादीशाने स्नानसिद्धये। तथा चोक्तं दानखंडे। यत्र दिङ्नियमो ना
स्ति जपहोमादिकर्मसु। तिस्रस्तत्र दिशः प्रोक्ता ऐंद्री सौम्यापराजिता। अपराजिता ईशानदिक्।
इति दिङ्निर्णयः॥ ७॥ अथ तिथिविचारनिर्णयः॥ मंत्रखंडे। शुक्लपक्षे द्वितीया च तृतीया पंचमी तथा।
बुधदेवगुरूपेता शांतिके वापि सप्तमी। षष्ठी त्रयोदशी चैव चतुर्थी नवमी तथा। सोमदेवगुरूपेता
पौष्टिके शंसिता बुधैः। अष्टम्या नवमी चैव दशम्येकादशी तथा। शुक्रभानुसुतोपेता शस्ता विद्वेष
कर्मणि॥ अष्टमी पूर्णिमासीत्प्रतिपन्नवमी तथा। शुक्रभानुसुतोपेता शस्ता विद्वेषकर्मणि। अत
स्वडर्दशी कृष्णा शनिवारे तथाष्टमी। उच्चाटने तिशस्तेयं त्रपशांकरस्तापिता। अमावास्याष्टमी
कृष्णा त्रयोदशी च चतुर्दशी। भानुमंदसुतोपेता मंगलेनाथवा युता। मारयेद्भूतलं होमात्कीलितं शत्रु
णामपि। एवं सिध्यंति कर्माणि तिथिवारानुसारतः॥ ॥अथ नक्षत्रकाला मुख्यप्रयामः। आमत्स
दीपकलिकायां। मृतोपमं देवले भरण्यामनदक्षिणा नयोयमजंरे १ विद्वेषेऽश्लेषापाशिर्वा दिमुखो
मघाख्याधयोः। २। प्रेरणे हस्तवायुमुखाः करमोदरे। ३। पौष्टिके मूले अश्वपानागजद्वारे ४।

मूकत्वे सर्वबाधायां मघियो ॥७॥ स्तंभने श्रवणे हस्ते न ना मेरु गर्त्ते ॥८॥ शोषणे कृत्तिकायां दहनं देहो ॥९॥
क्षरकरणे मा कृतनो दं विधिः ॥१०॥ आकर्षे मेघायां पुनर फाल्गुन्यां वा सर गर्त्ते ॥११॥ वशे फाल्गुन्यां
कुबेरालनो वरवंध रूद्दे या बुजे ॥१२॥ इति नक्षत्रं ॥ अथ सिद्धिकरणि शेषाणि तत्रैवोक्तं ॥ महाका
म्राश्च दुर्गायतन शून्यकं शंकरालये ॥ आरूढो नियमो नास्ति विदेशस्य श्मशानके ॥ कुमारं कुत्सिते
स्थाने शून्ये देवालये तथा ॥ श्मशाने कालिकास्थाने मेलमारुस मंत्रवित् ॥ दक्षिणानि मुखकाष्ठिला दं
ते सर्पी अधरं ॥ रिपुं स्मृत्वा जपं कुर्यात् सप्तवारेण मारयेत् ॥ इति स्थाननिर्णयः ॥ अथ पंत्र
मंत्राणां लेखननिर्णयः ॥ तदुक्तं ग्रंथांतरात् ॥ अथवा ॥७॥ मारणे तु लिखेत् पत्रे द्विषचर्मणि साधकः ॥
खरचर्मणि विद्वेषे मदउच्चाटने ध्वजे ॥ नरास्थि घनेच पट्टे वा च स्याकर्षणे सिद्धये ॥ स्तंभने वाहनेवै वेशि
वा वा तु जशस्यते ॥ क्षुरसंलापयोगेन शत्रूणां मारणे तथा ॥ लिखित मारयेत् सर्वं प्रेतवस्त्रेण नान्यथा ॥
शुभकर्माणि यान्यानि रातिकादीनि यानि नित्यमरणमृत्युं जपादीनि तानि नित्यं पटे लिखेत् ॥ इति पत्रं ॥
अथ लेखनद्रव्यं ॥ लिखितानीनि सिद्ध्यंति रोचना चंदनेन तु ॥ उशीरं लौरसं युक्ते नान्यद्रव्यैः कदा २२
चन ॥ आकर्षे तत्र नीरक्तं पंचत्वमप्यान्वितं ॥ नागेन्द्रमदसुक्तेन वश्यादिकमेव च ॥ स्फोत ॥ विषार्क सार

गुंजासृग्रक्तयोगेन मारणे ॥ ग्रंथांतरात् ॥ शिलाग्नि लोष्टापिंडानि धत्तूर रस रसतथा ॥ मूत्र धूम रक्ति कटुकं
चितांगारे निशा तथा ॥ यंत्राणां लेखने द्रव्यं मारणे कथितं बुधैः ॥ ग्रंथांतरात् पंचांगो मत्त रसे गृह्य विष
पुष्का रक्तेन मोहयेत् ॥ विषं धत्तूरसं चितांगार समन्वितं ॥ तथैवोच्चाटनादीनि क्षुद्र कर्माणि कारयेत् ॥ स्तंभने
कुनिकारस्के हरिद्रा हरितालेन सिद्ध्ये ॥ उत्तकनयनोद्भूतं पानीयं कारयेत् ॥ माहिषी घपुरीषं वा लिखेद् द्वि
द्वेषकर्मणि ॥ इति द्रव्यं ॥ अथ लेखिनी ॥ शांतिके पौष्टिके चैव आयकर्म विधौ तथा ॥ सर्वोपसर्ग
शमने कर्तव्या जातिसंभवा ॥ हेमरूप्यसमालक्ष्मे ताम्रजा वा त्रिलोहजा ॥ अपामार्गभवा वापि क्षुद्रकर्मसु
सिद्धिदा विद्वेषोच्चाटने चैव कृतेऽमने विषसंभवाः ॥ करंजकृतजा हा मारणे चरनास्थिजाः ॥ स्तंभकर्मणि
ज्ञेया राजवृक्षोद्भवा शुभाः ॥ दुर्वाजा वशफर्मसु आकर्षे धिम्बिपिष्ठजा ॥ क्षुरस्य तु दक्षिणांगस्था लेखि
नीनां प्रसरोपः ॥ अस्तु ने ष्टु च सर्वेषु प्रशस्तानी हेमजा ॥ इति लेखिनी ॥ ॥ अथ षट्कारादि
लेखननेदाः ॥ तदुक्तं ग्रंथांतरे ॥ अथातः संप्रवक्ष्यामि काम्यकर्म यथागमं ॥ येन तुष्यन्ति वश्यास्त्राणि
कामांत्रिका बुधाः ॥ षडकाराद्यो नेदायेन जानंति साधकाः ॥ न ते षां सिध्यते कार्यं कल्पकोटिश
तैरपि ॥ एतत्सर्वं विजानीयाच्छंभुना नाथितं पुरा ॥ मुख्यानि हस्ताकारांस्तु धायाश्च नाते तु ध्यान ॥

घृतात्यामस्यतेनकंमहकासोनविद्यते। अविदित्वातुयैलानिमंत्रयंत्राणियोजपसेन्। तृषापरिश्रम
स्तस्यपिबतेमृगतृष्णिका। संयोगःप्रत्नयोरोधोग्रथनंचविदर्भणं। संपुटः सर्वकार्येषुविज्ञेयोम
न्त्रसाधके। संयोगादौलिखेन्नामपृष्ठत्रयेचांतसंस्थितं। आद्यंतरंतयोरोधोग्रथनेकाक्षरेगतु
मुक्रमेणविदर्भस्तुसंपुटोमध्यसंस्थितः। संयोगः शांतिकेयोज्योवश्येप्रत्नवईष्यते। मारणेचवि
द्वेषेरोधःपौष्टिकेचैवग्रथनं। विदर्भेश्यमारोग्यं संपुटः सर्वकर्मसु। अथविवर्णमाह। देवदत्त
ह्रींसंयोगः। ह्रींदेवदत्तपल्लवः। ह्रींदेवह्रींदत्तह्रींरोधः। ह्रींदेह्रींवह्रींदह्रींत्तह्रींग्रथनं। ह्रींतह्रीं
दह्रींवह्रींदेह्रीं। विदर्भणं। ह्रींदेवदत्तह्रींसंपुटः। इतिषडाकारभेदाः।६। अथशृंखलादिभे
दाः। तदुक्तंयोगरत्नावल्यां। शृंखलाबंधनयोस्तन्नाराचकेकचासिनी। तुंडीमुद्गरस्तथाकर्त्त
रीमुशलांकुशं। कंटकश्शलासिशक्तिशोभनंचकर्मलिवादिशोल्। बंधनेदरिपुध्वंसछेदसंधा। वि
नेदिनेसैन्यभंजनविद्वेषमंत्रछेदनचालने। मारणेसर्वकार्येषुचालनंजनकर्मणि। शृंखलादीनि
विधानिसाध्यमंत्राणियोजयेत्प्रागादौफट्पुनःप्रांतेमंत्रवर्णस्त्रिरंतरे। साध्यनामेतिसामोक्ता २२
शृंखलान्येषयंक्रमः। रसाग्नीश्चक्रामाहीवेदार्कासीपुराजिष्णु। एषांकक्रपूर्वैः शृंखलादी

नानुक्रमात्।।६।३।१४।१।१३।१५।८।१२।२।५।३।११।७।२।१०। इतिशृंखलादिभेदाः।। ।।इतिश्रीनेगः आ
ननकालदिकूलाचिलीयांतरनेत्तत्रसालसिद्धिकस्सेत्रपत्रश्यालोकिनीषडाकारश्शृंखलादिभेदनिर्ण
योनामनवमःप्रकाशः।। ९।। ।। अथमंत्राणांछंदऋष्यादिनिर्णयः।। यथारत्नखंडे। आर्षंछंदश्च
दैवत्यंविनियोगस्तथैवच। वेदितव्यंप्रयत्नेनसर्वकामार्थसिद्धये। अविदित्वातुयःकुर्यादघजपाध्य
यनंतपः। तेषांमंत्रजनाशानितस्यचाल्पफलंलभेत्। अज्ञानातितत्वेनआर्षंछंदश्चदैवतं। वि
नियोगंनचैवास्तुतस्यसम्यक्फलंभवेत्। तद्यथा। येनयद्दृषिणादृष्टासिद्धिःप्राप्ताचयेनवैमंत्रे
णतस्यतस्योक्तऋषिर्भावितस्तदार्षकं। छंदनाछंदउद्दिष्टंवाससासैखवाक्रतेः। आत्मासंछादितो
देवैर्मृत्योर्भीतैस्तुवैपुरा। आदित्यैर्वसुभिरुद्रैस्तेनछंदांसिवैस्मृतः। यस्ययस्यातुमंत्रस्यउद्दि
ष्टायादेवता। तदाकारंभवेत्तस्यदैवत्यंदैवतोच्यते।। इतिछंदऋष्यादिनिर्णयः। अथप्राणप्रतिष्ठा
निर्णयः। तदुक्तंमंत्रमुक्तावल्यां। अविश्लेषांधारणीसरणीसमायःसर्वेयदृशादेतियात्तिच। या
सर्वान्साधकेभ्योनिधत्तेतस्यैनित्यंप्राणशक्त्यैनमोस्तु। प्राणप्रतिष्ठाविहितंविहीनंविधा
नंभवस्यतेस्यजातिसर्वसिध्यै। यस्मादतेमीकपिलाःसर्वेगाद्यघाभवेयुर्गतजीवकल्पाः। प्र

ज्ञेलिंगेतथात्मनोमंडलेप्रतिमासु च। आदौप्राणप्रतिष्ठाप्य प्राणमंत्रेणमंत्रवित्। ग्रंथांतरात्। ये
नप्राणप्रतिष्ठामंत्राः प्राणवंतो भवंति ते। तद्यथा। पाशांकुशपुटाशक्तिर्मायाबिंदुविभूषिता। या
द्याःसप्तसकारांताः ओमसर्गेंदुसंयुताः। समस्तोऽयं समंत्रःस्यात्ततोमुख्यपदंभवेत्। प्राणाइतिवदे
त्पश्चादिहप्राणास्ततःपरं। अमुष्यजीवइहस्थितोमुख्यपदंभवेत्। सर्वेंद्रियाण्यमुष्यांतेवाङ्म
नश्चक्षुरंततः। श्रोत्रप्राणपदेप्राणगृह्यगत्वासुखंचिरं। तिष्ठंतुस्वाहेत्यवधिरंते प्राणमंत्रोयमी
रितः। अमुष्यमुख्यपदंसर्वंपाशादीनिप्रयोजयेत्। तथागेयेषुसमाख्याताः प्राणमंत्रोमनीषिभिः॥
ब्रह्मविष्णुशिवास्तेकाऋषयःस्तंत्रवेदिभिः। उक्ताऋग्यजुःसामछंदःपदेविशारदैः। चैतन्यरू
पाप्राणाख्यादेवताशक्तिरीरिताः। कवर्गाद्यैर्वियत्पूर्वंमंत्रैर्हृदयमीरितं। शिरश्चवर्गशाद्यै
रायिलनंदनंतथा। स्यानेंद्रियेटवर्गाद्यैस्तच्छिखापरिकीर्तिता। कर्मेंद्रियेपवर्गाद्यैःकवचंपरी
कीर्तितं। वचनाद्यैःपवर्गाद्यैर्विलोचनमुदाहृतं। बुध्याद्यैर्यादिसंयुक्तैरस्त्रमस्यप्रकीर्तितं।
आत्मन्येतासमाख्याताअंगमंत्राःसजातयः। नाभेश्चरणपर्यंतंपाशबीजंप्रविन्यसेत्। हृ २४
दयान्नाभिपर्यंतंशक्तिबीजंततःपरं। मूर्धादिचरणंयावत्इंकुशंविन्यसेत्ततः। हृदयेधातुषु

न्यसेद्धृदयंसवर्णेद्वयंहायकं। कर्याव्यापकमेतेनसमस्तेनविधानवित्। ततोविचिंतयेद्देवींआवस्
लांजगन्मयीं। ग्रंथांतरात्। अस्यप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुशिवाऋषयः। ऋग्यजुःसामा
निछंदांसि। प्रतिछंदोवा ७ ८ः जगत्सृष्टिकरीप्राणशक्तिःपराहृक्रतिर्देवता। ह्रूंसंबीजंस्वाहा
शक्तिःवाआंबीजंक्रोंशक्तिःह्रींकीलकं। चतुर्विधपुरुषार्थेजपेविनियोगः। ह्रींबीजेनकरस्तुद्विंवि
धायन्यासंकल्पयेत्। तद्यथा। ॐआंह्रींक्रोंहापृथ्व्यप्तेजोवाय्वाकाशात्मनेङंघंगंखंकंक्रोंह्रींआं
हृदयायनमः। ॐआंह्रींक्रोंशब्दस्पर्शरूपरसगंधात्मनेञंझंजंछंचंक्रोंह्रींआं। शिरसेस्वाहा।
ॐआंह्रींक्रोंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेणंढंडंठंटंक्रोंह्रींआं। ॐशिखायैवषट्।
ॐआंह्रींक्रोंवाक्पाणिपादपायूपस्थात्मनेनंधंदंथंतंक्रोंह्रींआं। कवचायहुं। ॐआंह्रींक्रोंवचना
दानगमनविसर्गानंदात्मनेमंभंबंफंपंक्रोंह्रींआं। नेत्रत्रयायवौषट्। ॐआंह्रींक्रोंमनोबुद्ध्य
हंकारात्मनेहंसंषंशंवंलंरंयंक्रोंह्रींआं। अस्त्रायफट्। इतिविन्यस्य।
नाभेर्हृदयोपदंपाशबीजंहृदेशात्तनाभिदेशंचशक्तिं। आपादकेशांमस्तकादंकुशाख्यंन्यस्ता
पादान्तालधुसमरूद्य॥ ७॥ व्याख्या। पादतलादारभ्यनाभिपर्यंतं। आं इतिविन्यस्यनाभेः

हृदयं यावत् ह्रीं। विन्यस्य आहृदयात् मस्तकं क्रों इति विन्यस्य ओं यं त्वचि। रं असृजि। लं मांसे। वं
मेदसि। शं अस्थि। षं मज्जायां। सं शुक्रे। हं आत्मनि। सां प्राणे जीवे चैव। हं सवर्णं इत्यनेन न्या
पकं मस्तकादि। एवं न्यस्य प्राणशक्तिस्वरूपं विन्यस्य ध्यायेदात्मरूपां च देवीं आरक्ताब्धि। हंसबी
जं प्राणे विन्यस्य मूलमंत्रेण पादादिमस्तकान्तं मस्तकादिपादान्तं व्यापकं न्यसेत्। अथ मंत्र
स्त्वेवं। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः सोऽहं अमुष्य नवशक्त्यात्मक प्राणाः अमुष्य प्राणा इह
स्थिताः। अमुष्य पृथिव्यप्तेजोवाय्वाकाशात्मक शब्दस्पर्शरूपरसगंधात्मक त्वक्चक्षुर्जिह्वाघ्राणश्रोत्र
त्रात्मक वाक्पाणिपादपायूपस्थात्मक मनोबुद्ध्यहंकारचित्तात्मक वचनादानगमनविसर्गा
नंदात्मक सर्वेंद्रियाणि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा। यं रं लं वं शं षं सं हं सः क्रों ह्रीं आं
ॐ इति व्याप्य पश्चादात्मभावनया देवीं ध्यायेत्। तत्र यथा। रक्ताम्भोधिस्थपोतोल्लसदरुणसरो
जाधिरूढा कराब्जैः पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान्। बिभ्राणासृक्क
पालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः। २५
ध्यात्वा देवीं प्रजपेल्लक्षं समाहितधीः। आसनेनानेन कुर्याच्चरुणा तद्दशांशतो मंत्री। जप्त्वाग्नि

मा
तेयंत्रे भुवनेश्वरीप्रोक्तं परिकल्प्य तत्र परमेश्वरीमावाह्य संपूजयेत्। अग्न्यादिकोणेषु। हृदैवतैः सह धावुको
णक्रमेण। ब्रह्मणे नमः। हरये नमः। रुद्राय नमः। आग्नेयपश्चिमेशानकोणेषु। गणपतये नमः। वटुकाय नमः।
क्षेत्रनाथाय नमः। अङ्गानि संपूज्य दिक्षु अङ्गानि संपूजयेत्। अष्टदलेषु अष्टमातृकाः संपूजयेत् दिक्षु
लोकपालान् पूजयेत्। ततः सपरिवारां देवीं सर्वोपचारैराराध्य रक्तोत्पलैः किंशुकैर्वा जपा
कुसुमैर्मालाविधानतः कुलार्कं कुर्यात्। बीजैरेकैकैः धारं तद्यथा। ॐ अमृतायै स्वाहा। ॐ रं वैवस्वता
यै स्वाहा। ॐ लिंगाक्रान्तायै प्राणप्रदायै ... भ्रमतायै ॐ हं विस्फुलिंगि
न्यै ॐ ह्रीं तेजःप्रतिष्ठायै स्वाहा। ७। इति सिद्धमंत्रः। ७। प्रयोगे ध्यानं। कं ऊं वधोपाशबीजे
न साध्यं शत्रुं स्मरन् शक्तिबीजेन न्युनयः। प्राणानाकृष्यांकुशेनाथ पादौ हूं ... साध्यनामा
यथावत् मृता। विवस्वता ... प्राणान् ... तथा। आकृष्य ... भ्रमता विस्फुलिंगी
ना। तेजःप्रतिष्ठी ... प्राणाद्रूपः स्वयादिकाः। आरब्धा। साध्यं पुरुषं आं इति पाशबीजेन कं
ठे बध्वा ह्रीं इति शक्तिबीजेन गृहीत्वा क्रों इत्यंकुशबीजेन त्वगादिधातून् हृदि आक
र्षयेत्। तद्यथा। आं ह्रीं क्रों यं मृतेम्लात्मके देवदत्त साध्य प्राणान् त्वग्धातून् आकर्षय आकर्षय ॐ हूं

वैवस्वते वैवस्वतात्मके देवदत्तस्य रक्तधातून् आकर्षयामि। ॐ ऋं जीवहे जीवहात्मके देवदत्तस्य मां
सधातून् आकर्षयामि। ॐ लं प्राणे हे प्राणहात्मके देवदत्तस्य मेदोधातून् आकर्षयामि। ॐ इयां
आहृष्याकर्षणि आकर्षणात्मके देवदत्तस्य अस्थिधातून् आकर्षयामि। ॐ ॡं सर्वसनेय
सनात्मके देवदत्तस्य मज्जाधातून् आकर्षयामि। ॐ एं सन्नमते नमतात्मके देवदत्तस्य शुक्रधा
तून् आकर्षयामि। ॐ ऐं विस्फुलिंगिनि विस्फुलिंगात्मके देवदत्तस्य सर्वधातून् आकर्षयामि।
॥७॥ मुद्रेशोपजनेश्विरा धसमये ॐ आं ह्रीं क्रों तेजप्रातिहरि तेजप्रातिहर्यात्मके देवदत्तस्य सर्व
धातून् आकर्षयामि। ४ साध्यस्य पादादारभ्य ध्येकांतं अर्कविक्षापरूपे साध्यास्ततः कं गं अध्या
नत्वविपीड मेव सह साकायस्य कण्ठगिरः स्याघालाः तुम्निला सितरि पुरगणं साध्यं स्मरेत् साधकः।
वायवाग्नावि इयाशि महेशाक्रष्या सोम मेलरायप्रपंकेषुमंत्री ध्यानेषु प्रातन् हं सान्स्वाय
नवीयाविदुम्रवधान्। स्यापाप्येवं संस्मरेत् हृत्सरोजे नृंगी रूपनिर्गतान् स्यात्समागे साध्या जगण
न् पंचरीकान् गृहीत्वा स्वायत्तानं हृद्यवत्संप्रविष्टान्।८। तद्यथा। साध्यस्य हृदयकमलाहृद २९
ज्जेणुयादिविर्णानां भ्रमररूपाणां। वायव्यां दहज्जेयकारः। अग्नेरकारः। हृद्येनकारः। पाश्चिमे वकारः।

ईशे शकारः। नैर्ऋत्ये षकारः। उत्तरे सकारः। दक्षिणे हकारः। कर्णिकायां हंसबीजं। एतान् भ्रमररूपा
न् बिंदुरूपेणलंतुनावधान् ध्यायेत्। तद्यथा। वीजानि रक्तानि चवशपकर्मभूपं जोधराजालपंक्तिवा
रकालेषु भ्रमराणि च हृषविधौ वहेमोहे। तानि संस्तंन विधौ स्मरेच्च। एवं ध्यात्वा साध्यप्राणान्
मंत्रकाकारधारिणो ध्यायेत्। तद्वभ्रीयनन्तस्य कोधान् तुरंकाराः स्तव्या निचारादौ। कृत्वा प्राणप्र
शासंत्वा प्रतिष्ठां पुत्तलादौ येत्रपदे यथारे। नृंगावृष्या साध्यदेहाद् हक्तानां स्वायेपत्तेवापदे
हः प्रकारः। किंतु स्वायेरूपरोग्नेम्वर्शेवश्पाढ्यारेवनाग्निचारे। पाशाधन्विकपुष्कमल्कर
यन्नमध्यस्त्रायिलानिर्यत्साध्यदनातरं धूपयत्लोपास्रं नवाजिह्वेतुरत्नी। योन्यायात्मकहृदय
मेवमनिशं भाव्यपसौ। चिंतिलाशक्तिर्जन्मशतान्यपापिह वशयेत्साध्येन याकर्षयेत्। मंत्रस्पा
ह्नामकारोन्याश्रमं कृप्राणप्रतिष्ठामकारश्ववकुवक्तसमासि। तथापि पितृरूपपात्रं स्यमा
नाद्यविपश्चिलरप्पुपरस्पते। प्राणप्रतिष्ठाविधिरेवमुक्तः सांगःप्रयोगः विनियोगयुक्तः। अ
स्मत्प्रणीतो गिरिकाननादौन् प्रचालयेत् प्राणपतो विधाय॥ ॥इति श्रीनेग॰ ७ं देवरूपसिंदे
वनाप्राणप्रतिष्ठानिर्णयनामोद्दशमप्रकाशः॥ १०॥ ॥अथार्घपात्रार्घ्यनैवेद्यनिर्णयः।

तदुक्तं बृहत्पद्धत्यां ॥ लेपकः ॥ जपः सारस्वताख्येषु मंत्रेष्वर्घं सदापयेत् ॥ नरस्य सिध्यं स्यवश्यं हि मद्
कर्मलिन संशयः ॥ नरपात्रं महाभागे विशेषं चोत्तमं किल ॥ नालिकेरोद्भवं देवि विशेषं चोत्तमम
धमं ॥ रत्नपात्रं च सुश्रोणि ज्ञेयं चोत्तमकन्यसः ॥ मध्यमोत्तमकं देवि तारं मध्यममध्यमं ॥ ताम्र
पात्रादिकं चैव राजसं परिकीर्तितं ॥ लोहपात्रं समानीया मारणोच्चाटने तथा ॥ स्तंभनकार्येषु
काचपात्रं प्रशस्यते ॥ काष्ठपात्रं विभाना यो मंत्राराधनकर्मणि ॥ नरपात्रं च गृह्णीयात् भुक्तिमुक्ति
प्रसाधने ॥ इत्यर्घपात्रनिर्णयः ॥ ॥ अथार्घभेदः शारदातिलके ॥ गंधपुष्पाक्षतयवाकुशाग्र
तिलसर्षपैः ॥ सदूर्वैः सर्वदेवानामेतदर्घ्यमुदीरितं ॥ ग्रंथांतरात् ॥ अथवासवर्णानां रक्तागुड
युतं जलं ॥ अर्घार्थं समुपादेयं इत्याह भगवान् शिवः ॥ इत्यर्घनिर्णयः ॥ ७ ॥ अथ वासना ॥ तदुक्तं
मंत्रखंडे ॥ वासनात्रय यथा चोक्ता कर्मसिद्ध्यानुरूपिणी ॥ शांतिके सौम्यरूपा सौ पौष्टिके वश्यक
र्मणि ॥ सर्वांगो … वासना … हि कर्मणि ॥ विद्वेषे साध्यरूपं तु पीड्यमानं भजेत्स्म
रेत् ॥ मारणोच्चाटने कार्या वासना क्रोधरूपिणी ॥ काकोलूकादिभिः शत्रुं नश्यमानं … स्म 27
रेत् ॥ इत्येवं वासना कार्या स्थानं ध्यानमथोच्यते ॥ अथ स्थानध्यानानि ॥ तदुक्तं पंच … गुह्यके

र्योन्मत्तेस्स नः स्थिरं ॥ रसः सिद्धिस्तथा वश्यं आसृष्टिः कालवंचनं ॥ जपगादीनि नूतानि कार्याणि ते
समागमं ॥ सारस्वतं तु यात्स्वेतं वामवाहेन साधयेत् ॥ रुद्रस्य मकूणिकामध्ये स्थिरचित्तेन योज
येत् ॥ भूतलेपौष्टिकोसिद्धि शत्रूच्चाटनमारणं ॥ विद्वेषं विवादे चैव रणे आ विमोहनं ॥ शांतिके
पौष्टिके वश्यं साधयेत्संकरादितः ॥ भ्रुवो मध्ये द्विपत्रे तु दक्षवाहेन साधयेत् ॥ सुषुम्ना विधाम …
धामी सत्कृत्वा … ॥ यस्य मंत्रस्य यथा ने ध्येयं स्थानगतं बुधैः ॥ अथ वासवर्णित्राणा ध्या
नं सिद्धिकरं श्रृणु ॥ कंदाद्विगुणता ध्यात्वा … शक्तिसमुच्छिता ॥ शुद्धस्फटिकसंकाशा शांति
के पौष्टिके तु च ॥ सारस्वते रसे मोक्षे खेचरत्वे रसायने ॥ आरक्ता सर्ववश्ये तु रक्ता च नमोहने पि
च ॥ आकर्षणे ध्यर्धवादे कोटक्षे सिद्धिदायिनी ॥ पीता मुच्चाटने द्वेषे सुलक्षणा मारकर्मणि ॥ इति
स्थानध्यानानि ॥ अथ मंत्रध्यानं ॥ उद्यार्करक्ता शिशिर धूम्र … शोसितावर्णाः ॥ देवताध्या
नं मंत्रवत्कुर्यात् ॥ ७ ॥ अथ पल्लवः ॥ तदुक्तं भैरवपद्धावलीकल्पे ॥ विद्वेषाकर्षणोच्चाटनेषु क
… फडिति फडितिम योज्यं वश्यपवषट् वौ विधेय च घे घे स्वाहा ॥ स्वधा शांतिकपौष्टिके च ॥ तथा
चोक्तं समरशाली कल्पेन मोत्तः शांतिके पौष्टिके चैव मलिपालेषका … ॥ वश्याकर्षणयोर्मेषु

स्वाहांतः सिद्धिदायकः। वौषट्पल्लवसंयुक्तो मंत्रः पुष्ट्यादिसाधकः। हुंकारपल्लवोपेतो मारणोच्चा
टनादिगा। यंत्र एजं नफार्वे मुसु घोरेत्न पनायाने त्रवडंतो महाकल्पोक्तमालाविनाथकः। फट्
नोच्चाटने वधे मंत्रः फट्पल्लवान्वितः। उक्तं चागमे खिले वै डामरे चार्थे एतेषु रत्नं इन्द्रशेषयथा दा
नोच्चरस्तथा द्वेषो आकर्षणं तु विशेषतः। स्वाहांतपल्लवोपेते सिध्यते नात्र संशयः शांतिकं तु महा
देवी महासंपत्तिवर्धिनी नमस्कारं इदं मंत्री जपे सिध्यते ध्रुवं। पुष्ट्यादिकेषु सर्वेषु वश्याकर्षणे
योरपि मतस्स माहस्वाये तु वौषट्कारं नियोजयेत्। मृत्युकर्मसु घोरेषु मातिविच्छेदहेतुषु।
हुंकारं योजयेद्देवि सर्वशत्रुविनाशने। विद्वेषोच्चाटने चैव खड्गकरणे तथा। फट्कारेण म
योगेन सिध्यते नात्र संशयः। आज्ञाभावसमायोगेषु मंत्रस्य पठनेषु च। नमस्कारं समाख्यातं मं
त्रसाधनमुत्तमं। तथा चोक्तं योगरत्नावल्यां। वषट् स्वाहा वषट् श्रौषट् हुं फडेतास्तु जातयः।
शांतौ वश्ये तथा पुष्टौ रुद्धाकृष्टाहमारणे। शेषेऽपि शांतनामेनेशा। तिजातिसमन्वितः। मंत्रः
शांतोपि रौद्रत्वं हुंफट्पल्लवविलोपदि। ॥इति पल्लवनिर्णयः। ॥अथ मुद्रा॥ तदुक्तं भैरवप २८
द्मावतीकल्पे। अंकुशसरोजबोधधालसस्वस्तिकवज्रमुद्रास्तु। आह्वानादिषु परा शांतिकविद्वे

षणरोधवधसमये। ग्रंथांतरात्। पद्ममुद्राः क्रमशो ज्ञेयाः पद्मपाशगदाख्याः। मुसलाशनिखड्गा
याः शांतिकादिषु कर्मसु। इति मुद्रा॥ अथाक्षमाला। तदुक्तं मंत्रखंडे जपमाला। दिसिध्यतेम
त्राणां साधनोच्यते। अष्टोत्तरशतं चैव चतुःपंचाशमेव वा। सप्तविंशामालि वापि कर्त्तव्या जप
मालिका। उत्तमामध्यमाहीना त्रिधामोक्ता क्रमेण तु। तथा च ग्रंथांतरात्। पंचविंशति मोक्षा
र्थे सप्तविंशति पौष्टिके। त्रिंशत्तु धनकामार्थे अष्टत्रिंशाद्भिचारके। अष्टौत्तरपंचदशाभिच
भिचारफलप्रदा। इति ग्रंथांतरे। पुनाधिके महादेवी नैव सिध्यति साधकान्। मंत्रखंडेप्यु
क्तं ध्यानान्विता सा नाम रूपुक्ता शिवोदिता। मंत्रप्रपत्तता। सिद्धये शांतिके वाचपौ। ष्टिके। स्फा
टिकामौक्तिकी वापि प्रोक्ता मासिकस्तत्र के। सर्वकामप्रसिध्यर्थं जपेद् युग्माक्षमालया। सारस्व
तेप्रवाले छावश्ये सेवप्रकीर्तिता। रक्तचंदनजा वापि सौवर्णी राजती तथा। पद्मरागमयी वापि
शमने पद्मजी वा। सोलप्यारक्तसूत्रेण प्रसत्रेयथ पुनः। धर्मकामार्थमोक्षार्थं जपेत् प्राप्त
मालया। मणिभिः ग्रथितं सम्यक् नतैः रक्षमार्थसाधने। निधानयत्रिणो सिद्धौ मौनवासिन सत्र
के। अन्यदंतमणिसोनातबोलेजपमालिका। गर्दनस्थाप्य धोदंतैर्महारूपप्रस्य वालके। अ

पमाला मस्कर्ज्याशत्रूणां मारकर्मणि। प्रेतदंतैरथोनूतैः कल्प्यावा जपमालिका। नरस्नायुकृतसूत्रेण
प्रोतल्वा मारकर्मणि। अरिष्टजापनाद्वश्यो तामिलशिरोरुहैः। मारयेत्तिलसंदृहोयहिराङ्कसमोरि
पुः साध्यदेहनखैः केशैः ग्रथिता द्वेषकर्मणि। निंबकाष्ठमयी वापि विद्वेषकृथिता बुधैः। स्नालि
नापंचगव्येन गंधतोयेन तथोपरि। पश्चात्तन्त्रापंचरूपातु सर्वकार्याणि साधयेत्। कलिकंटकमा
ख्यातं दोलमाने च लंबने। चलतैवेर्वापि द्वेषं द्वेषवैसाधकस्य च। मुखेन मुखं अंगुलसंयोगं दृष्टो दृष्टिं न
योजयेत्। मेरुहर्वमुखंरुत्वा न्ममेतं नागबंधनं। ७। तथा चोक्तं नृसिंहपुराणे। अनावेल्वहत्मा
लायाः कुशग्रंथ्याथपाणिना। जप एवं हि कर्तव्य एकाग्रमनसैवहि। तथा चत्वं ग्रंथांतरे मारम्पा
नासिकाग्रं सान्त्प्रागरहत्तिणेनैव क्रमात्। न जंगीमतजपर्यंतं जपेदेशांसु पर्वसु मध्यमादिद्वयं
पर्वं जपकाले विवर्जयेत्। एतन्मेरुविभागो वा हूप्रितं ब्रह्मणपुरा शिवपुराणे। अंगुल्या जप
संख्यानमेलहेकमुदाहृतं। रेखयाष्टगुणं विद्यात्पुत्रजीवैर्दशाधिकं। शतं स्यात् शंखमालाभिः
प्रवालैस्तु सहस्रकं। स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते। पद्माक्षैर्दशलक्षं तु सौवर्णैः २६
कोटिरुच्यते। कुशग्रंथ्या च रुद्राक्षैः अनंतगुणितं भवेत्। कुशग्रंथ्याफलोक्तनिधांजप
नं

विशेषविषयं। ग्रंथांतरादप्यंतरे मातृकात्रमाला। अंतर्विद्रुमभासमानभुजगी पुंशांतुवर्णोज्वलामारो
हमाति दृशौ शतमयी वर्णाहरकाष्टोत्तरा। हंसब्रह्मविधेर्हिमेरुशिखरां श्रीमातृकाक्षावली। विधानो
मिवि। चित्रमंत्रजननी ज्ञानेक दीपांकुरा। इत्येतत्तरमालानिर्णयः॥ अथ जपलक्षणनिर्णयः। तदुक्तं
ग्रंथांतरात्। उष्णीषी कंचुकी नग्नो मुक्तकेशो मलावृतः। अपवित्रकरोऽशुद्धः प्रलपन्न जपेत्क्वचि
त्। क्रुद्धो भ्रांतः क्षुधार्तो निद्रालस्यादि संयुतः। दर्शने सति नीचानां जपकर्म विवर्जयेत्। आच
मनं दर्शने तेषां सकुर्यात्प्राणसंयमं। निरासनो शिरस्तो नो वा गच्छन् तिष्ठन् एव वा। रथ्यायामशि
वे स्थाने न जपेत्तिमिरांतरे। प्रसार्य पादौ न जपेत्कुक्कुटासन एव च। देवरूपमयं मालां ध्यायेदात्मा
न मात्मना। तथा चोक्तं मंत्रखंडे। एवं ध्यात्वा जपं कुर्यात् मानसो पांशु वाचकं। शांतिके पौष्टिके मो
हे मानसं जपमाचरेत्। वश्यादिरूक्षानु पांशुः स्याद्वाचकं तु क्रूरकर्मणि। तथा चोक्तं नृसिंहपुराणे।
त्रिविधो जपयज्ञः स्यात्तस्य भेदान्निबोधत। वाचिकश्चउपांशुश्च मानसश्च त्रिधाकृतः। त्रयाणां
जपयज्ञानां श्रेयः स्यादुत्तरोत्तरः। यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः। मंत्रमुच्चारयेद्व्यक्तं जप
यज्ञः स वाचिकः। शनैरुच्चारयेन्मंत्रमीषदोष्ठौ चचालयेत्। किंचिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः।

विधाय वा त्वरनिश्चेष्टो वर्णाद्वर्णं पदात्पदं । शातातपः । अनुचिंतनो न्यासः स च को मानसो जपः । याज्ञवल्क्यः । उपां
शुजपयज्ञस्य स्यात् शतगुणो भवेत् । साहस्रो मानसः प्रोक्तो यस्माद्ध्यानपरो हि सः । शंखः । अंगुष्ठैः प
र्वण्या दिपर्थः । जपः शतगुणो हस्तपर्यः । नचक्रमन्नचहसन्न चपार्श्वमवलोकयन् । नापाश्रितो नतत्र
जल्पन्न प्रावृतशिरास्तथा । नपदा पादमाक्रम्य न चैव हि तथा करौ । नचासमाहितमना नच संश्रा
वयन् जपेत् । तथा चोक्तं कूर्मपुराणे । जपकाले न भाषेत नान्यानि प्रेक्षयेद्बुधः । न कंपयेच्छिरोग्री
वां दंतान्नैव प्रकाशयेत् । गुह्यका राक्षसा सिद्धा हरंति प्रसभं यतः । एकांते सुशुभे देशे तस्माज्ज
पं समाचरेत् । अंगिराः ॥ विना दर्भैश्च यत्स्नानं यच्च दानं विनोदकं । असंख्यातं च यज्जप्तं सर्वं
तन्निष्फलं भवेत् । नरत्नाग्नेस्तु यज्जप्तं यज्जप्तं मेरुलंघने । यज्जप्तं श्रद्धया हीनं तत्सर्वं निष्फलं
भवेत् । एकैकाक्षरविन्यासं न द्रुतं न विलंबितं । असंदिग्धं जपेन्मंत्रं नादबिंदुकलात्मकं । गाय
त्रीकल्पे । प्रातर्नाभौ करं धृत्वा मध्याह्ने हृदि तथा । सायं नासासमुपासीत त्रिविधं जपलक्षणं ।
अंगुष्ठानामिकाभ्यां तु जपेदुत्तमकर्मणि । अंगुष्ठमध्यमाभ्यां तु जपेदाकृष्टिसिद्धये । तर्जन्यंगु ३
ष्ठसंयोगाद्विद्वेषोच्चाटने जपः । कनिष्ठांगुष्ठकाभ्यां तु जपेन्मारणकर्मणि । अंगुष्ठेन जपेत्काप्य

अन्यैरंगुलिभिः सह । अंगुष्ठेन विना जापः स सर्वो निष्फलो भवेत् । ग्रंथांतरात् । जप्तो कृतयुगे प्रोक्तं त्रेतायां
द्वयं स्मृतं । त्रिकं द्वापरे चैव चतुष्कं मुनिभिः कलौ । मंत्राणां जपः कार्यः सर्वदाक्षरसंख्यया । वर्ण
जप्तं जपेन्मंत्रं न वितथं कर्म तत् । होमस्तु करशाकोतु जपस्तु द्विगुणो भवेत् । तावत्पुष्पसहानेन ताव
द्वै समहज पेत् । ग्रंथांतरात् । यत्र जपे समं विधात् गोष्ठे दशगुणं विदुः । पुण्यारण्ये तथारामे सहस्रमधि
कं तथा । अयुतं पर्वताग्रे च नद्यां लक्षमुदाहृतं । कोटिर्देवालये प्राहुरनंतं शिवसन्निधौ । ग्रंथांतरात् ।
अग्न्यर्के हृत्तथा वामे समीपे द्रुममंदिरे । जपमद्यत्तिगाग्रे न कुर्याच्च शिवालये । अन्येषां च परान्तु
नां मंत्रं न विमुखं पठेत् । न जाप्येन विना सिद्धिर्न होमेन विना फलं । न ह्यजयाविनाशोऽथ मंत्रसाधनकर्म
णि । जपो ध्यानं तथा पूजा होमः स्याद्द्विनिषेचनं । तर्पणं चेति कर्माणि बहुकाम्यानुसिद्धये । मनोन्यत्र शि
वोन्यत्र शक्तिरन्यत्र चिंतनं । कल्पकोटिसहस्राणि न सिध्यति कदाचन । चिंताजालशतैर्बद्धा इंद्रियार्थे
षु लंपटाः । अशक्ताः प्रणिधानेन न ते सिध्यंति साधकाः ॥७॥ मंडलं च जपेन्मंत्रं मातृकाक्षरसंपुटं ।
अनुलोमविलोमेन मंत्रसिद्धिर्भवत्यतः ॥ इति जपलक्षणनिर्णयः ॥ अथ मंत्रसिद्धेरुपायकथनं । न
कृतं मंत्रखंडे । अनुष्ठितो यथान्यायं यदि मंत्रो न सिध्यति पुनस्तावदनुष्ठेयं ततः सिध्यति वत्सले । पुनः

सीनुष्ठितो मंत्रो यदि सिद्धो न जायते। उपायाः सप्त कर्तव्याः स सशंकरभाषितः। भ्रावणं बोधनं वश्यं पी
डनं शोषपोषणे। दहनांतं क्रमयोगेन सप्त संस्या शंकरोदितं। भ्रावणं वारुणं बीजेन ष्टथनं क्रमयोगतः॥
तन्मंत्राद्यंतमालिख्य शिलाॐ कमकस्पर्टिः। उशीरचंदनाभ्यां च मंत्रं संत्राघ्य लिखेत्। ताराद्यंतो यम
धुज्ञिः मध्ये लिखीतां क्षिपेत्। हृज्जनाकम्पनाद्यो मालन्त्र विलः सिद्धो न वेत्। इति लोपि न सिद्धश्चेत्त बो
धनं तस्य कारयेत्। नारस्वलेन बीजेन सपुटीकृत्य तं जपेत्। एवं बुधो न वेत्सिद्धो नोचेन्नस्य वशीॐ
हुत्वा आरक्तं चंदनं कुष्टं हरिद्रामदन…। एतैस्तु मंत्रमालिख्य भूर्जपत्रे तु शोभने। धार्यः कंठे
न चेत्सिद्धो पीडनं तस्य कारयेत्। अधरोत्तरयोगेन पदेन परिजाप्यते। ध्यायीत देवतां नद्दृदधरो
त्तररूपिणीं। विधामाद्दित्यपद्धुग्धेन निखित्वाक्रम्य… तथा मलेन मंत्रेण होमः कार्यो दिने दिने
पीडितो नक्रयाविद्यो सिद्धसाधय पोषयेत्। नित्यं वश्यपुरं बीजं नमोपल्लवं स्वपोषयेत्। गोक्षी
रैर्मधुनालिख्य विधापायणो विधारयेत्। पोषितो यंजवास्ति धोनो चेत् … यश्च शोषणं। तामयंत्र वी
जाभ्यां मंत्रेण … ।एवं विधागले धार्या … शोषितोपि न सिद्धश्चेद्दह ३९
नीदाग्निवीजतः। आग्नेयेन रवाजेन मंत्रस्यैकैकमक्षरं। आधं चम धठंधं … योजयेत् दहत्कमाणि।

…जस्ततैलेन मंत्रमालिख्य धारयेत्। कण्ठदेशे ततो मंत्रः सिद्धस्याद्रकरोदितं। इत्येव सर्वमंत्राणां सुषा
पः शंकरोदितः॥ इति मंत्रसिद्धिकराः सप्तोपायाः॥ ॥इति यानेगप्रज्ञानीय अर्घ्यपात्रार्घ्यनिवेदासना
सनध्यानमंत्रसाधनपञ्चदेवताध्यानं पञ्चमुद्रा तमालाजपजल्पमंत्रसिद्धिकरोपायकथनं नाम ए
कादशः प्रकाशः॥ ११॥ ॥अथ साधारणस्नानक्रम। तत्र … यामसमाचाधिक्ता यां प्रबोध
मापाद्य शौचाचमनदंतधावनमुखप्रक्षालनादिकं कृत्वा स्नानोपहारं गृहीत्वा तीर्थतीरं गच्छेत्। तत्र शोध
नं … कृतावंतिष्ठं … विरोधेन … कर्म समाचरेत्। हस्तोपादौ प्र
क्षाल्याचम्य मूलेन शिखाबंधनं। कुशाल्तस्नानं … अथ … णोदसादिना
प्रयोग… ॐ नमो भगवति … मिलि मिलि … पावय पावय स्वाहा। अनेन मंत्रेण
आगमोक्तेन पुष्पांजलिं गंगायै निवेदयेत्। गंगे च यमुने चैवादिना पठित्वा त्रिकोणं हस्तपद्मं कोणाष्ट
दलं तु चैतरस्त्रं … प्रकर्तव्यं … धेनुयो
न्यासं … अघमर्षणं कुर्यात्। प्राणायामत्रयं पूरककुंभकरेचकक्रमेण। १६।६४।३२। ततः
कलशमुद्रया … दिशावारं … नमस्कृत्य मूलेन तिलकं कुर्यात्। आचमनं देवपितृमनुष्याणां

संतर्प्य देवेभ्यः स्वाहा। ऋषिभ्यो नमः। पितृभ्यः स्वधास्तु। तत्त्वेभ्यो वषट्। ततो वैदिकसंध्यां करिष्य इति
संकल्प्य संध्योपासनं कुर्यात्। यथा। वामहस्ते जलं धृत्वा मध्यमया वीजेनाभ्यां दक्षिणहस्तेनाच्छाद्य
पंचकलशं वै त्रिवारमभिमंत्र्य हं यं रं वं लं पंचतत्त्वबीजं। ततो मूलेन सप्ताभिमंत्र्य त्रिर्जलं हस्तात् शिरसि त्रि
वारं संप्रोक्ष्य परिशिष्टं दक्षिणहस्ते गृहीत्वा घ्राणेनेडयाकृष्य अंतः कृत्वा निखिलं किल्बिषमङ्गा
जनेन कृष्णवर्णं पिंगलया जलमध्ये विरेच्य तज्जलं शिलापरि त्याजयित्वा अस्त्रेण वज्रशिलां ध्यात्वा
क्षालयेत्। हस्तौ प्रक्षाल्य आत्मतत्त्वादिना आचमनत्रयं। ततः ॐ हंसः इत्यादि स्मृत्वा कृत्वा मातृका
न्यासं कृत्वा हृदि देवता कल्पोक्तन्यासं कुर्यात्। ततः ॐ हंसः इत्यादि स्मृत्वा मंत्रगायत्रीं जपेत्। जपं देव्या
हस्ते निधाय वैदिकसंध्योपासनं कुर्यात्। तदनंतरं गृहमागत्य सामान्यार्घ्यं संपाद्य धारक्ष्मां कर्पूरेणांबु
नाधारं संशोध्य ततो मंडपद्वाः दक्षिणशाखायां पाशांकुशवराभयमादलिंगधरं चतुर्भुजं गणेशं
पूजयेत्। ॐ गं गणपतये नमः। वामशाखायां क्षेत्रेशं कालाग्निनिभं त्रिनेत्रं त्रयार्पिंगोर्ध्वशिरोरुहं
सर्पभूषणं चतुर्भुजं खट्वांगडमरुनागपाशधरं ध्यात्वा ॐ क्षं क्षेत्रपालाय नमः। द्वारोर्ध्वे शुद्धस्फटिक ३२
संकाशां त्रिनेत्रां ज्ञानमुद्रापुस्तकधारिणीं कुंकुमानुलेपनां सरस्वतीं पूजयेत्। ॐ ऐं सरस्वत्यै

नमः। अधोद्वारमध्ये पीतवर्णां चतुर्भुजां वराभयवरकांबुजद्वयधारिणीं त्रिनेत्रां सर्वाभरणभूषितां
द्वारश्रियं पूजयेत्। ॐ श्रीं द्वारश्रियै नमः। ततो वामदक्षिणयोः कामदेवाय रत्यै नमः। वसंताय प्री
त्यै नमः। पुष्पाक्षतं गृहीत्वा समस्तद्वारागदेवताभ्यो नमः इति संपूज्य। तयोः पार्श्वयोः गंगायमुने
पुष्पवारिभिः देहल्यादिभिरर्च्चयित्वा। अस्त्रमंत्रितवारिभिः तिकमालया स्तुगुरुपादनमः। अनंतरं देहली
कं योदावरश्चाविशो कनादृदिवानुसारयोद्दिष्टान्। अस्त्राद्भिः तदिति गालपार्ष्णिघातेन त्रि
भिर्भौमानि विघ्नानि निवारयेत्। अपसर्पंतु ये भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्तार
स्ते नश्यंतु शिवाज्ञया। इत्यनेन मंत्रेण पुष्पं परिक्षिपन् प्रविश्य वामांगे संहृत्यासनं संस्थाप्य
तु। आसनमंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो देवता आसनपरिग्रहे विनियोगः। ॐ पृथ्वि
त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनं। इति मूलमंत्रेण
मंत्रेण वा पुनः पुनरुपदेशोऽहमस्मि। इति प्रविश्य शिवादिभ्यो गुरुभ्यो नमः। गुर्वादिवंदनं विधाय अस्त्रमं
त्रेण करशोधनं तालत्रयादि दिग्बंधः नाग्निप्राकारान् विधाय प्राणायामत्रयं कृत्वा भूतशुद्धिमा
चरेत्। यथा। शंखमुद्रापनेनामृतमास्राव्य ॐ आधारशक्तिं शुद्धस्फटिकसंकाशां अंगुष्ठमात्रं सु

पुरम्भावर्णा गंधाद्दशानरव्वेपरमात्मनि हं संहृत्य नेनमंत्रेण संयोज्य किंचित्कालं संचिंत्य दानं दक्षपंगरवंभुल
संचिंत्य ॐ क्लां ब्रह्मणे हाघिप्याधिपतये निवृत्तिकलात्मने हुं फट् इति पादादि जान्वंतं विन्यस्य ततः पंचो
घातेन प्राणायामं ॐ ह्रीं विष्णवे अब्धिपतये प्रतिष्ठाकलात्मने हुं फट् इति आजानोः पायवंतं संस्पृ
श्य तद्घातं चतुष्टयेन प्राणायामं ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मने हुं फट् स्वाहा इति गु
ह्यादि हृदयांतं संस्पृश्य तद्घातत्रयेण प्राणायामं ॐ ह्रैं ईश्वराय वाय्वधिपतये शांतिकलात्मने हुं
फट् इति हृदयांतं घातद्वयेन प्राणायामं आब्रह्मरंध्रपर्यंतं संस्पृश्य ॐ ह्रौं सदाशि
वायाकाशाधिपतये शांत्यतीतकलात्मने हुं फट् स्वाहा । एकेनोद्घातेन प्राणायामं इति भूतानि संहृ
त्य पंचस्ति वायुबीजं धूम्रवर्णं बिंदुयुक्तं कोटिलमंडलस्थं नाभौ संचिंत्य द्वयक्षरं संचिंत्य नेनैव मार्गेण
बाह्यः स्थापतीनीला पेतं स्थेन संयोज्य तदुक्तेन वायुना महापातकपंचांगपातकोपपातकयुक्तं
पापकरोमाणं कृष्णाकारमेघं स्मरेत् । ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजद्वयं सुरापानहृदयु
क्तं गुरुतल्पकटिद्वयं तत्संयोगिपदद्वयं उपपातकोपपातकरोमाणं रक्तश्मश्रुविलो 33
चनं खड्गचर्मधरं पापं वामकुक्षौ विचिंतयेत् । एवं भूतं पापपुरुषं संशोष्य कमयपिंगावक्रे

संचिंत्य नाट्रशंकु दक्षमंडले संयोज्य तदूर्ध्व मंत्रं रं वह्निना पापपुरुषं संदह्य दक्षमार्गेण भस्मना सह
रेचयेत् । वमित्यमृतबीजं शुक्लवर्णं चंद्रोपेतार्धचंद्राकारमंडलस्थं ईगवक्रे संचिंत्य ललाटस्थेना
इशेन संयोज्य तदुद्भवामृतवारिणा तत्भस्म संप्लाव्य तद्भस्मना विरेचयेत् । तत्संप्लावितभस्ममध्ये एकं
बुद्बुदं संचिंत्य तन्मध्यात् त्रिभुवनव्यापिसहस्रादित्यसमतेजः संचिंतयन् एकविंशतिवारं ह्रीं इति व्या
वर्ण्य इमिति पृथ्वीबीजेन पीतवर्णेन चतुरस्राकारवज्रांकितमंडलेन कठिनीकृत्य इमिति काशबी
जेन कृष्णवर्णेन वृत्ताकारमंडलेन दृढं सुधारीकृत्य न्यादेशा देवतानां देवो देहं उत्पन्नं इति भावयेत् ।
ॐ ह्रौं सदाशिवाय व्योमाधिपतये शांत्यतीतकलात्मने नमः । इति ब्रह्मरंध्रे ॐ ह्रैं ईश्वराय वा
य्वाधिपतये शांतिकलात्मने नमः । इति वदने ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मने नमः ।
इति हृदये । ॐ ह्रीं विष्णवे अब्धिपतये प्रतिष्ठाकलात्मने नमः गुह्ये । ॐ ह्रां ब्रह्मणे पृथ्व्यधिपतये
निवृत्तिकलात्मने नमः इति पादयोः । एवमुत्पन्ने देवतात्मके देहे हृदयांतस्थं परमात्मनः सर्वात्मकं
जीवं सोऽहमिति हृदयमानीय प्राणप्रतिष्ठां कुर्यात् । सर्वांगे षडंगन्यासादिकं कृत्वा अनेन मंत्रेण प्रा
णप्रतिष्ठां कारयेत् । मंत्रस्तु यं ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः अमुष्य प्राणा इह प्राणा

अमुष्य जीव इह स्थितः अमुष्य सर्वेन्द्रियाणि अमुष्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चि
रं तिष्ठन्तु स्वाहा। सोऽहं हंसः हं सं यं वं लं रं यं क्रों ह्रीं आं ॐ। तत आत्मानमेकं तावत्प्राणायामेन शक्त्यु
त्थाप्य अमृतमात्मानं भावयेत्। आकाशमादिरितानेषु अकारादिक्षकारान्तानि अक्षराणि न्यसेत्। तत्र
था। ॐ मातृकामन्त्रस्य ब्रह्मा ऋषिः गायत्री छन्दः मातृका सरस्वती देवता हलो बीजानि स्वराः शक्तयः
चतुर्विधपुरुषार्थे विनियोगः। ध्यानं। पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशां भा
स्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदातां। अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणां पद्म
संस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि॥१॥ इति ध्यात्वा न्यसेत्। तदुक्तं सिद्धसार
स्वते। आद्यो मौलिस्तथापरो मुखवृत्ते ईक्षणे च कर्णयुग्मनासावंशपुटे अस्तत दन्तमौष्ठवर्गौ कपोल
द्वयं दन्ताश्च ओष्ठाधरत्वयोर्मुखयुगलं संधयस्तरणिक्रमात् जिह्वामस्तपुटयोर्विन्दुरपरो सावीसर्गा
स्वरः॥२॥ कादिर्दक्षिणतो भुजस्तदपरो वर्गस्तथा वामो भुजः हादिस्तादिरनुक्रमेण चरणे कुक्षिद्वयं ते
फफौ॥ वंशः पृष्ठजघोषनाभिहृदयं याद्यैश्च यं धातवो याः सप्त समीरणस्य सपरे ह्लः क्रोधद् ३४
त्वमिके॥३॥ इति बाह्यमातृका॥ अथान्तर्मातृका। तदुक्तं शारदातिलके। आधारे च चतुर्दला

रुणरुचि वासान्तवर्णाश्रयं स्वाधिष्ठानमनस्ववेधुतरुचि बालान्तषट्पत्रकं॥ रत्नाभं मणिपूर
कं दशदलं डाद्यैः फकारान्तिकैः पत्रैर्द्वादशभिरनाहतरुचिहेमकमवर्णावृतं मात्रानिर्दलषोडश
स्वरयुतं धूम्रोति विशुद्धाम्बुजं हे लोपस्तरपीड युक्तहसं सुआरलोपमा श्रांभुजं। तस्मात्
पद्मं सहस्रं छदं विमानेन्दुमयं सदाशिवपदं शक्तिं नुमः शाम्भवी॥ इत्यन्तर्मातृका। कुण्डलिनी
ध्यानं। मूलाधारान्तस्फुरितनाडी भास्वद्भास्करस्तरूपा गच्छे सामस्तकं मणुतरां गजसामूलस
जसूला। सोऽपूर्णाधाचरणनिपुणा सा सचिन्तानुबन्धाध्यातास घोमृतमयरके आवयेसोर्व
सोमात्॥ शिरशिनिपतिताया विन्दुधारासुधायाः नवतिविधिसमायामानाचिरं गन्तुसाधयि
त्वायडसमस्तं प्रातिनां तस्तु तेजः। अनलस्यन धून स्तोदाद्यवेत्मनेजः॥ अथ मातृकाषडङ्गं। ॐ
संनं पस अनामिकाभ्यां नमः ॐ वं पं ॐ अंकं खं गं घं ङं आं अंगुष्ठाभ्यां। ॐ इं चं पं ईं तर्जनीभ्यां ॐ
उं टं पं ऊं मध्यमाभ्यां ॐ एं तं पं ऐं अनामिकाभ्यां। ॐ ओं पं पं औं कनिष्ठिकाभ्यां। ॐ अं यं अः कर
तलकरपृष्ठाभ्यां। इति करन्यासः। अथाङ्गन्यासः। एवं ध्यानरात्रौ। हृदये शिरसि शिखायां कवचा
स्त्रेषु च चतुर्थिकयानमः स्वाहा वषट् हुं वौषट् फट् पदैः षडङ्गविधिः। तद्यथा। अं कं खं गं

घृं ॐ आं हृदयाय नमः। ईं चं पं आं शिरः। ऊं ॐ पं शिखा। ऐं तं पं ऐं कवचं। ॐ पं पं औं नेत्रत्रयाय वौषट्। ॐ अं
घृं ॐ अः अस्त्राय फट्। इति मातृकाषडंगं विन्यस्य। ततो येष्वां धारा हृद्देवतानां तस्याः कल्पोक्तन्या
सं कुर्यात्। ततो पीठन्यासमारभेत्। तद्यथा। प्रोक्षणीयपरिहृत्य स्वस्तिकमंडलं गंधादिभिः संहृत्य
शालिभिः कर्णिकामापूर्य कोणानि तंडुलैरन्नं कल्पयेत्। अस्मिन्नष्टदले नास्तोयोपरि सात्तं देवपदं
परिस्थाप्य तत्र पीठस्थांकुरं पात्रं सा चैवं मध्ये पीठाग्रमं कुश आपं कनकवर्णं ध्यात्वा ॐ आधार
शक्त्यै नमः। तस्य मूर्ध्नि स्थितं नीलं ध्यात्वा ॐ कूर्माय नमः। उपरि अस्य शिरसि आसीनं श्वेतं ध्यात्वा अ
नन्ताय नमः। तन्मूर्ध्नि दिग्व्याप्य स्थितवसुंधरं चक्रधरं ध्यात्वा ॐ वाराहाय नमः। तद्दंष्ट्रास्थितां मा
त्र्यामलां नानादेववरधारिणीं स्फुरत्सागरमेखलां ध्यात्वा वसुमत्यै नमः। तत्र श्वेतद्वीपं ध्यात्वा
ॐ श्वेतद्वीपाय नमः। तत्र रत्नाद्रये नमः। तत्र मणिमंडपाय नमः। तत्र कल्पतरवे नमः। तस्याधस्ताद्वे
दिकायै नमः। तस्योपर्युपरि संहस्य। तत आग्नेयादिषु चतुष्कोणेषु ॐ धर्माय नमः। ॐ ज्ञानाय न
ॐ वैराग्याय नमः। ऐश्वर्याय। इति संहस्य पूर्वादिषु ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। अ ३५
वैराग्याय नमः। अनैश्वर्याय नमः। एकत्र पामहृदि इन्नीलानात्पादरूपिणः। हृत्पत्रकेसरस्थितेन

रूपान् धर्मादिकान्न्यसेत्। गात्रेषु स्थापयेत्तांस्तु नरः सर्वांगुलक्षणान्। आग्नेयादिषु कोणेषु दिक्षु नास्त्वं
यजेद्बुधः। ॐ आनंदकंदाय संविन्नालाय ॐ सर्वतत्त्वात्मकाय पद्माय नमः। ॐ प्रकृतिमयपत्रेभ्यो
नमः। ॐ षोडशविकारात्मककेसरेभ्यो नमः। पंचाशद्वर्णबीजमयकर्णिकायै नमः। ॐ अं सूर्यमंडला
य द्वादशकलात्मने नमः। ॐ सोममंडलाय षोडशकलात्मने नमः। ॐ वह्निमंडलाय दशकलात्मने
नमः। ॐ सं सत्त्वाय नमः। ॐ रं रजसे नमः। ॐ तं तमसे नमः। ॐ आं आत्मने नमः। ॐ अं अन्तरात्मने
नमः। ॐ पं परमात्मने नमः। ॐ ह्रीं ज्ञानात्मने नमः। इति कर्णिकाया उपर्युपरि स्तजयेत्। चिंतयेत्। ॐ
मेधायै नमः। ॐ प्रज्ञायै नमः। ॐ विद्यायै। ॐ धियै न। ॐ धृत्यै न। ॐ स्मृत्यै। ॐ बुद्ध्यै। ॐ विघ्ने घर्ये
नमः। एवं पीठं हृत्पिवाम्स्वमंत्रसमुच्चार्य पश्चात्स्वात्मना सुधा। पानीयतोयस्नानात्। नाडि
कारं प्रागलं करस्थमात्रकां भा जंचैतन्यं पुष्पसंचयेस बाह्ममंत्रं ब्रह्मरंध्रेण मूर्त्या भावयेत्सुधा।
संस्थापनं संनिधानं संनिरोधमनंतरं। सकलीकरणं पश्चादवगुंठनं अमृतीकरणं तः
ध्यात्वा कुर्यान्नपरमीकृतिः। क्रमादेतानि कुर्वीत स्वमुद्राभिः समाहितः। मुद्रास्तवेन भुवनेश्वरी कल्पे।
सम्यक् संहृत्य पुष्पैः करांभोरचितांजलिः। त्रिनेत्रं गतले ज्योतिर्विलीनं स्मृति दिक्षु। एवानुमथमा

मुद्राकपित्थाकाराहृन्नेत्रेबुधैः।ऊर्ध्वाधोमुखामुद्रास्थापनेसंस्थापनेपुनः।उत्तानौगुष्ठयोगेनमुष्टीरूपक
रूपया।यासंनिधीकरणीनाममुद्रादेवार्चनविधौ।अंगुष्ठगर्भिणीसैवमुद्रास्यात्संनिरोधिनी।
उत्तानमुष्टियुगलासंमुखीकरणीमता।अंगेषडंगविन्यासःसकलीकरणंमतं।।अग्रथांत
रान्।अन्योन्याभिमुखाश्लिष्टकनिष्ठानामिकापुनः।तथातर्जनीमध्याधेनुमुद्रासमीरिता।अ
मृतीकरणेकुर्यात्तयादेशिकसत्तमः।संमुखीकृतपतर्जन्यौबद्धमुष्टिद्वयात्ततः।सव्यापसव्येभ्रम
णामुद्रेयमवगुंठनी।अन्योन्यांगुष्ठसंलग्नाविस्तारितकरद्वयी।महामुद्रेतिविख्यातान्यूनाधि
कसमापिनी।अंगुष्ठौविधिवत्कुर्यात्कनिष्ठामूलसंस्थितौ।हस्तौद्वौमुकुलीकृत्ययोनि
रेवासमास्थिता।शारदातिलके।अथोपचाराःकथ्यंतेमंत्रवित्स्वागतादिकान्।स्वागतंकुश
लप्रश्नंनिगदेद्यतोगुरुः।पाद्यंपादांबुजेदद्याद्देवस्यहृदयाणुना।ततुश्यामाकदूर्वाब्जवि
ष्णुक्रांताभिरीरितं।स्वधामंत्रेणवदनेदद्यादाचमनीयकं।जातीलवंगकंकोलैस्तदुक्तंतंत्रवेदिभिः।
अर्घ्यंविछेत्तलोमूर्ध्निशिरोमंत्रेणदेशिकः।गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपैः।सदूर्वैःसर्व ३९
देवानामेतदर्घ्यमुदीरितं।स्वधाणुनाततःकुर्यान्मधुपर्कंमुखांबुजे।आज्यदधिमधुमिश्रमेत

उक्तंमनीषिभिः।तेनैवमनुनाकुर्यात्पुनराचमनीयकं।गंधाद्भिःकारयेत्स्नानंवाससीपरिधापयेत्।दद्या
यज्ञोपवीतंचरुत्राद्याभरणैःसह।नासक्रमेणमनुनापवित्रान्मातृकाक्षरैः।अनामार्दयेगंधाद्यैःअंगा
दीन्पुनरर्चयेत्।गंधचंदनकर्पूरकालागुरुभिरीरितः।कमलोत्पलकरवीरबकुमुदतुलसीद्वयाकेतकीक
क्षरंचपकोत्पलंकुंदमंदारपुन्नागपाटलीनागचंपकं।आरग्वधंकर्णिकारंपारलीवनमालिका।
सौगंधिकंसकोरंटंपाशाराशोकमाधविका।अर्जुनार्जुनकंबिल्वकदंबमुनिपत्रकं।अन्यान्यपिसु
गंधीनिपुष्पकाणिदेशिकैः।उपदिष्टानिहस्तायामारदीवविचक्षणैः।मलिनंभूमिसंस्पृष्टंकृमि
केशादिदूषितं।अंगसंस्पृष्टमाघ्रातंत्यजेत्पर्युषितंगुरुः।देवस्यमस्तकेकुर्यात्कुसुमोपहितं
सदा।हस्ताकालेदेवनायाःनोपरिभ्रामयेत्तदा।अगुरुसारगुग्गुलशर्करामधुचंदनैः।धूपयेद्दो
ष्मसांनिध्येनीचैर्देवस्यदेशिकः।कर्पूरकहरगिरिण्यासर्पिषातिलजेनवा।आरोप्यदर्शयेद्दीपा
न्देवसोरनशालिनः।स्वादुपदंशंविमलंपायसंसशर्करं।कदलीफलसंयुक्तंसाधसंज्ञमिनिवेदयेत्।
नंतरंजलंदद्यादुपचारान्तरंततः।एवंसर्वोपचारैस्तुहृदयेनार्चयेद्देवनां।उक्तंचरात्रखंडे।समाप्तो
यदिमानीयान्मयेतद्यथाशक्तितः।तावदेवपुनःकुर्यान्नावृत्तिंसर्वकर्मणां।प्रधानस्यक्रियायत्र

स्थाने न क्षिपते पुनः। न दग्धं स्यात्क्रियायां तु नावृत्तिर्न च न क्रिया। अथ पंचायतनस्य प्रकारः। ग्रंथांत
रे तदुक्तं। सूर्यैकदंतौ सुतशक्तियुक्तौ रुद्रा विघ्नेशशक्ति हरिविष्णुसूर्याः। श्रीनाथविघ्नेशनगावि
केशाः चंडीशहेरंबपतंगरुद्राः। श्रीकंठसूर्याम्बुरुहाक्षिकाजा मध्यस्थिते मध्यविदिक्षु संस्थाः। स्व
स्थानगाः सर्वमनोरथांस्ते यच्छंति विघ्नानि परत्र संस्थाः। स्वस्थानवर्जिता देवा दुःखशोककरा ध्रुवं।
तन्मंडलाधिपो राजा राज्यपक्षस्य विनश्यति। इति पंचायतनस्थानभेदः। अथ मध्यस्थिता। एकांत
आरवेः समतिस्त्रोदधा द्विनायके। ततस्त्वे विष्णुदेवस्य शिवस्यार्द्ध मरुशिला। तथास्य त्र्यंशोत्तप
नास्त्र लिंगहृदयं सूर्यग शहृदयमेव च। शक्तिश्च पंचपाशांप्यमन्सादि हृदयाकार्तिक। दौ शरेषो नार्चये
चैत्रशार्दि त्रामशिलाद्वयं। चक्रे वारकावासेनार्च्य सर्वदेव पन्नथा। गतेणा हननान्त्रिपमुद्दणं
मासुले गृही। अथ मूर्त्तिभेदः। तदुक्तं विष्णुपुराणे। अनुक्तस्थानरूपस्यादेवताप्रतिमान्
पाषाणे रजतो ताम्रो वृत्तमा मूर्तिः कीर्तिता। किंच अपि ह्यलेपो शानिजवित्तानुसारतः। आ
मास्यात्मपर्यंतं कर्तव्या राज्यवर्जितैः। वास्तुशास्त्रं एको गुरुमारम्भ विनास्ति यावद्देवता। गृह ३२
गुप्तिमास्थानं न घोरत्वं नैर्विना। सुवर्णं जनितं ताम्रमारकूटं तथैव च। सोहं त्रिपुरघास संधा

नः परिकीर्त्तिताः॥ इति श्रीनैगमसाधारणस्थानानामाहात्म्यद्वादशप्रकाशः॥१२॥ ॥ अथ मंडपा
दिलक्षणं। तदुक्तं ज्ञानखंडे बोधायनः। मध्यांगुली कूर्परयोर्मध्ये प्रामाणिकः करः। बद्धमुष्टिः करो र
त्निररत्निः सकनिष्ठकः। छंदोगपरिशिष्टे। अंगुलांगुलमानं तु यत्र यत्रोपदिश्यते। तत्र तत्र बृ
हत्पर्वग्रंथिभिर्मिनुयात्सुधाः। अथ पंचरात्रे। कुर्याद्विहस्तयागेषु चतुर्हस्तं तु मंडपं। नृसाऽष्टह
स्तवास्तं नानूहवान्कुर्याद्द्विजसमान्। मंडपार्धे छिन्नावेदः स्याच्चूडान्विता तथा। वलिका
मध्यस्तेषां तत्र द्वादशकं पुनः। बाह्ये पी प्रमाणेन तत्र सत्त्वं विनागतः। मध्यमोत्तमयोर्वेदिमं
डपस्य त्रिभागतः। चतुर्थांशो छिन्निम्नस्या त्रिसप्तपंचतोपि वा। नवैकादशद्वादशाद्यद्वादशिका
भिः प्रकल्पयेत्। कनीयान्द्वारस्तंभस्यामध्यमोद्वादशान्वितः। तथा षोडशभिर्हस्तैर्मंडप
स्यादिह्नोत्तमः। वेदसंख्या चतुःसंख्या निस्पर्धः। चूडा शिरः। सरूपस्तं न शिरसि तदुपरि तन
रध्वं वलिका स्थेत्यार्थक्रियते। बाह्य इति आप्तं तर्विन्यसेत्तत्तं च चतुःपापेन्नथा बाह्यतः। आ
यमर्थः। हस्तमध्यस्तंभचतुष्टयं विन्यस्य तन्तो बाह्यपरिधौ स्तंभं द्वादशकं विन्यसेत्। एवं षो
डशहस्तो मंडपः संपद्यते। सच भागद्वातिशा कृपश्चिमा यत्नस्य हस्तितोलराय लस्यवात्

न्नसत्रस्पृहत्तापांशपरिमितं अंतरालं विहाय स्तंभान्निवेशनीयाः इत्यर्थः। कनीयसे द्विकरमितिक
नीयसे मंडपे द्विहस्तविस्तारं द्वारं कार्यं मध्यमोत्तमयोस्तु चतुरंगुलाभिवृद्ध्या विधेयं। विश्वकर्मवास्तु
शास्त्रे। मंडपान्तरमुक्तं ज्येष्ठकर्तव्यमंडपद्वयं। धाम्नो धाम्नान्तरं पक्षकाद्वितीयमंडपं कुर्यात्। यद्वुधा
मास्ते मंडपं क्रियते तद्धामपरिमाणं मंडपान्तरं पक्षकाद्वितीयमंडपं कुर्यादित्यर्थः। कलाहस्तषोड
शहस्तैः कृतैः सप्तविंशुसंख्याधा विंशत्यधास्तु मंडपाः। अथ मंडपाः तथा चोक्तं शार्वदेवस्यां। कनि
ष्ठाधम कनिष्ठमध्यम २ कनिष्ठोत्तम ३ मध्यमाधम ४ मध्यममध्यम ५ मध्यमोत्तम ६ उत्तमाध
म ७ उत्तममध्यम ८ उत्तमोत्तम ९। क्रमेणाष्टौ द्वादश चतुर्दश षोडशाष्टादश विंशति द्वाविंशति
चतुर्विंशति हस्ता मंडपाः कार्याः नमस्तेषां। जयविजयनंद्रा विश्वरूप श्रवधनद धन्वकसुप्रसन्न
नामानः। अथ मंडपसाधनं। सत्र्यपेहस्ते दिक्सूत्रं मध्यसाधनहस्तं वेकां सर्वपार्श्वमलस्यैवलक्षणा
वेदविलेखनैः। सत्रपातविभागेन द्वाराणि परिकल्पयेत्। कोणेसत्रविभागेन कोणांस्तैव षडकार
येत्। मंडपस्य प्रमाणेन सत्रं संगृह्य मंत्रवित्। त्रिपुटं तु ततः कृत्वा वेदिर्हिदुयथाक्रमं। मध्यमे त्रिपु ३८
टे हित्वान्येषामेव वंडकारयेत्। तत्प्रमाणेन वेदस्य मध्यमं पुटकं तथा। तत्प्रमाणं भवेद्देहस्तसामा

न्यलक्षणं। वेद्याविस्तारः पंचमांशो ज्ञेयावेदी अष्टांगुलिर्वा। आग्नेये नैऋते चैव वायव्येशा
नके तथा। वेद्याः कोणेषु विन्यसेन्मूलस्तंभानि वेशायेत्। कोणेषु चैव सर्वेषु कोणस्तंभानि वेशा
येत्। अंत्यांतरालानि हस्तमात्रिकाणि। गरुडपुराणे मंडपो दशगुणोन्नतः। तन्मध्ये द्विगुणा वेदी कुंडार्था
रांनवो घृतादानरवं ३। अष्टतोरणवस्त्रं नवतटशाखवासृतानि चामंडपस्य पस्यतिदिग्नतोद्वा
राण्येतानि कारयेत्। पंचहस्तसमाप्रासां स्तेविस्तारेणाद्विहस्तकाः अष्टांगुलानि विस्तारे सम
हस्तास्तथोत्तरे। पंचहस्ते कनीयसे मंडपे पंचहस्ताः। मध्यमे षड्ढस्ताः उत्तमे सप्तहस्ताः
द्वादशशाखा विधेया। तथा हि हस्ताप्रमृतिषडंगुलानि वृद्धयाविस्तारो विधेयः। मेखलफे द्वाद
शांशेन शंखचक्रगदांबुजं। भागाद्विक्रमयोगेन न्यस्तेलेषां सहगरुडं। पंचमांशं न्यसेत्
सर्वसाधारणो विधिः। तत्र संग्रहे मातिकुंडं पंक्तौ सुप्रोक्ता शास्त्रार्थकोविदैः। सप्तहस्ता
पताकास्युः सप्तमांशेन विस्तृता। लोकपालानुवर्णेन नवमीतु हतं समापालरक्ता द्वि
र्गास्यपंचहस्ताध्वजाः स्मृताः। द्विपंचहस्तैः दंडैः स्तंवशजैः संयुताः स्मृताः। द्विपंचहस्तैर्दशहस्तैः
गरुडपुराणे। पंचहस्ताध्वजाः कार्यास्ते पुष्पेन द्विहस्तकाः। सप्तहस्ताः पताकास्तु विंशत्यंगुल

विस्तृताः।पंचहस्ता पताका नागदंडाः पंचाशद्वेशिताः।सिंदूरा कर्बुरा धूम्रा धूसरा मेघसंनिभाः।६
सिता पांडुवर्णाश्च स्तम्भा वर्णा दिग्विक्रमात्।एवं वर्णाः कुंडा कार्याः पताकाः पाकशासनात्।
नाविष्णुपुराणे।वेदीपादान्तरे कुण्डमाकुंडानि नवपंचवा।वेदास्रं चैरस्राण्येतानि वर्त्तुलानपि
शाकचित्राः वेदास्राणि चतुरस्राणि।आम्नायरहस्ये।कुंडानि चतुरस्राणि वृत्तनानाकृती
नि च।नवपंच तथैकं वा कर्तव्यं लक्षणान्वितं।नवकुंडविधाने तु दिक्षु द्वादशकोष्ठिते।नवमं
कारयेत्कुंडं सर्वेशानादिगन्तरे।विधाने पंचकुंडानामीशाने नवमे नवेत्।शान्तरत्नावल्यां।
दिक्षु वेदास्रवृत्तानि पंचमं त्वीशगोचरे।नारदीये पि।यत्रोपदिश्यते कुंडं चतुष्कं तत्र कर्मणि।
वेदास्रमर्द्धचंद्रं च वृत्तं पद्मनिभं तथा।कुर्यात्कुंडानि चत्वारि प्राच्यादिक्षु विचक्षणः।कुंडवे
द्यन्तरं चैव सपादकरसंमितं।पीठवत्वर्त्तयेत्कुंडं सुसमालेख्यगर्त्तकं।अर्कचंपरिशोधे।
भुक्तौ मुक्तौ तथा पुष्टौ जीर्णोद्धारे विशेषतः।सहस्रहोमेन यथाशान्तौ एकं वरुणदिग्गतं।कामिके
पुत्रलाभ दिक्षु तत्फलार्थं कुंडाकृतिर्यथा।ऐंद्र्यां स्तंभे चतुष्कोणं मध्ये भगेन गारुडीति।वश्यार्थ ३९
मारणे याम्ये नैर्ऋते द्व्यत्रिकोणकं।वारुण्यां शांतिके वृत्तं षडस्रमुच्चाटने।वायव्यापोहि

के पद्मं गौर्यां महासनमुक्तिदं।सर्वेषु चैतेषु होमानुसारेण हस्तादिमानं होत्रफलमुपकल्प
नीयं।नतुक्तं नारदीये पुराणे।मुष्टिमानं शतार्द्धे तु शते चारत्निमात्रकं।सहस्रे तु हस्तमेतद्यो
युते कुंडं करात्मकं।द्विहस्तमयुतं तं च लक्षहोमे चतुष्करं।अष्टहस्तात्मकं कुंडं कोटिहोमे तु ना
धिकं।मुष्टिमानमिति बद्धमुष्टिहस्तमात्रमित्यर्थः।गंधयामलतायां तं संसाधयेत्तु प्राचीं कुंडनि
र्माणमारभेत्।चित्रास्वात्यंतरं प्राचीकृत्तिकादर्शनेन वा एवं दर्शनेन वा।तथा प्राचीन प्राचीरविदर्शनि।
करणकार्यवात्प्रायः समाप्तिं निजहस्तहरिदिक्षु शंकोरायाति स्त्रेवेद्वरणेद्वकोणे।कस्तुरिका
लिसक्तितैव लिपरोक्ष्य प्रांगं न पेद्यनरि सुचितानुपालीयाज्ञवल्क्यायाव[illegible]कुंडस्या
न्तावद्वेगमानवेत्।आगमार्द्धेन वैसंकुलस्य[illegible]निरछन्।इदानीं चतुरस्रादिकुंडानामुद्ध
रक्रमोभिधीयते।चतुरस्रं तावद्द्वादशविश्वकर्मा[illegible]कोणतरमत्स्ययोः न्यास
सूत्रं ततः कोणे रेखे चतुरस्रकं।सर्वकेनापुपायेन[illegible]निश्चित्य प्राक्पश्चिमायतां रेखामालि
ख्य तामर्धभागेन संस्थापिता[illegible]दक्षिणोत्तरदिशोर्मध्यात्[illegible]सत्रोपरिस्थितां तर
निपातात्[illegible]

कर्णरेखापरिमितस्य सूत्रस्यार्धं तस्यार्धरेखायाः अपरप्रांते तस्यैव सूत्रस्यार्धं निधाय तन्म
त्ते निधाय कर्णसूत्रांतरं परिभ्राम्य रेखयेत् ॥ इति यद्वृत्तं कुर्यात् तस्य वृत्तद्वयस्य मत्स्यं दक्षिणोत्तरयोर्दिशो
मत्स्यद्वयं निष्पन्नं ॥ अथ मत्स्यद्वयेन पूर्वपश्चिमरेखालांछनं चैकं सूत्रं निपात्य दक्षिणोत्तरायतां रेखां लि
खेत् ॥ एवं दिक्षु साधितासु विदिक्षु साधनार्थं कोणलांछनं यथा तत्प्रकारः ॥ पूर्वनिष्पन्नरेखा
प्रांतचतुष्टयस्य मध्ये कं पार्श्वद्वये विकर्षितक्षेत्रपरिमाणस्यार्धमर्धं निधाय तस्य धौ कोणलां
छनानि कुर्यात् ॥ तत्कोणलांछनेषु सूत्रचतुष्टयनिपातनात् ह्रस्वादिक्षु द्वादशसु रस्य योनिकं चतुर
स्रं कुंडं कुर्यात् ॥ योन्याकारादिला मुद्रा रश्मेचतुरस्रप्रकृति वसुकामिकाशास्त्रात् ॥ पंचमांशं पुरो
गस्य मध्यवेदांशमानतः ॥ चमाश्वत्थपत्राभं कुंडं माग्नेयमुच्यते ॥ क्षेत्रस्य पंचमं भागं पुरस्ता
द्दिशि विन्यस्य वेदांशमानतः मध्ये कोणसूत्रस्य तिर्यक् षः ॥ वेदांशाः तत्पार्श्वः समातु सूत्रांतसूत्रा
नपरिभ्रमणेन अश्वत्थपत्राकारं कुंडमाग्नेय्यां दिशि कुर्यादिति अत्रायं निर्माणप्रकारः ॥७॥
पूर्वोक्तन्यायेन समचतुरस्रीकृतक्षेत्रस्य पश्चिमरेखामध्यात् पूर्वरेखामध्ये दत्ते क्षेत्रसूत्रपंच ४०
मांशाधिकार्गलरेखामालिख्य तेन स्पृष्टो कोणसूत्रानुरीयांशे लांछयित्वा तल्लांछनोपरि विन्य

स्यादेः सूत्रस्य सर्वोक्तार्गलरेखामूलविन्यस्तलांछनांतं परिभ्रमणात् वृत्तार्धं निष्पाद्य पूर्वापरकोणेऽपि
वमेव कृत्वार्धं चरेत् ॥ ततोऽर्गलरेखाग्रांतात् वृत्तद्वयप्रांतस्पर्शि सूत्रद्वयं निपात्य पिप्पलपत्राकार
माग्नेय्यां दिक्षु द्वादशसु रस्य योनिकं योनिकुंडं विदध्यात् ॥ एवं सिद्धं ॥७॥ चतुरस्रे रुद्रैर्भक्ते तत्र काद्यंतो
लद्दंशकोऽमध्येऽसत् तांशमानेन कुंडं खंडेंदुवन्नवेत् ॥ चतुरस्रक्षेत्रे रुद्रैर्नवभिर्विभक्ते आद्यंतो
त्का अवसिष्टसप्तभागमानेन सूत्रभ्रमणात् खंडेंदुसदृशं कुंडं कुर्यात् ॥ अत्रैवं कृत्वा चतु
रस्रक्षेत्रे नवधा विभक्ते तत्र प्रथमो ति मध्ये तिर्यग्भागद्वयं परित्यज्य अवसिष्टसप्तभागाधिमे
खागर्गलदिशोसूत्रार्धं निधाय तस्य भागसमकक्षस्य तिमिरे खागर्गलदिशोसूत्रांतं निवेश्य तत्सूत्र
परिभ्रमणेन प्रथमरेखानुस्पर्शिवृत्तार्धं विरचयेत् ॥ अथ प्रथमरेखाप्रांतद्वयमपि
हस्तार्धसंवेद्य दक्षिणोत्तराग्रविस्तृतमुत्तरास्यां निम्नुखयोनिकं खंडेंदुसदृशं कुंडं विदध्यात् ॥८॥
त्रिभागहृद्वितीयमध्येऽस्विन्निर्नैशाचरं भवेत् ॥ स्थानयेत्त्रिपांशत्रयहस्तामध्यवेणनैशाचरं ॥
नैर्ऋत्यां दिक्षु वधिकुंडं कुर्यात् ॥ इत्यायं संप्रदायः पूर्ववत् समचतुरस्रीकृतेऽनिर्भयोत्तरस्मिन्
पश्चिमरेखामध्यात्तिर्यग्वक्षित्त पूर्वरेखामध्ये दत्ते क्षेत्रसूत्रद्वादशभागाधिकार्गलरेखा

प्रांतात् सर्वतो भ्रमत्रिमरेखाप्रांतद्वयस्पर्शिसूत्रद्वयं निपातयेत् ऐन्द्र्यां दिशि तदग्राभिमुखयोनिकं त्रि
कोणं कुंडं संपादयेत् । एवं च विधीयमाने स्थानत्रये तृतीयांशत्रयवृद्धिस्तत्रैव समस्त्र्यश्रमपि नि
ष्पद्यत इत्येवं सिद्धं ।। छ ।। कर्णार्द्धं ह्यंशसंन्यासात् कुंडं स्यादिति । कर्णसूत्रार्द्धहीनांशसंन्यासा
द्वृत्तं कुंडं स्यादिति । कर्णसूत्रार्द्धस्य योऽष्टमांशस्तस्य संन्यासात् संपर्कन्यासात् वृत्तं कुंडं स्या
दिति । अत्रैष स्वनामकारः । चतुरस्रे तत्र कोणात् कोणांतरगामिनः सूत्रस्यार्द्धं कर्णार्द्धशब्द
वाच्यमष्टधा विभज्य एकभागमष्टांशो नाम तावंतं भागं चतुरस्रस्य बहिर्विन्यसेत् । ततो क्षेत्रगर्भदेशे
सूत्राद्यं निधाय बहिः स्थिताष्टमभागं विन्यस्तं तस्यैव सूत्रस्य प्रांतं सर्वतः परिभ्रमय पश्चिमदिशि
दर्शाभिमुखयोनिकं वृत्तं कुंडं कुर्यात् । एवं सिद्धं ।। छ ।। षड्भागाद्वितीयांशस्यैव स्वाङ्गभिः स्यात् षड
स्रं तत्र पार्श्वयोः प्रत्येकं षष्ठभागं वृद्धिं कृत्वा वा शिष्टस्य शीर्षस्य चतुष्टयमुत्पाद्य सूत्रनट्या
तात् षडस्रकुंडं निष्पत्तिरिति । अत्रैव संप्रदायः । समचतुरस्रे क्षेत्रे षोडशधा विभज्य पार्श्वानुष
ष्ठो भागस्तावता मानेन क्षेत्रस्य दक्षिणोत्तरपार्श्वे संम्लानद्वयं ये स्थाने वक्त्रेण मायात चतुरस्र ४१
संपादयेत् । अथ निरंतरोक्तपार्श्वद्वयरेखास्पर्शिनी दक्षिणोत्तरायतां गर्भरेखां रचयेत् । ततः

क्षेत्रमध्यात् उत्तरपार्श्वरेखामध्यावधि सर्वतो गर्भरेखार्धपरिमितमेकैकं सूत्रं निपातयेत् पूर्ववत् दि
शोत्तरांतराले समुत्पाद्यते नैव प्रकारेण पश्चिमभागयोरप्यंतराले समर्धं कुर्यात् ।। छ ।। अथ त्र्योपि
क्षेत्रमध्याद्दक्षिणपार्श्वरेखामध्यावधि प्रागुक्तरेखाप्रांतद्वयात् पृष्ठं च चतुष्टयस्पर्शिसूत्रचतुष्टयं
निपातयेत् । एवं लांछनांतरालस्थितसूत्रद्वयेन सह सूत्रषट्कप्रयोगात् षडसिद्धिः प्राङ्मुख
योनिकं षट्कोणकुंडं कुर्यात् । एवं सिद्धं । चतुरस्राष्टमभागेन कर्णिका स्यात् द्विभागशः । तद्बहि
रेकैकभागेन केसराणि प्रकल्पयेत् । तृतीये दलमध्यानि चतुर्थे दलसंधयः । क्रमेणामध्यकुं
डं स्यात् दलाग्रं दर्शयेद् बहिः । चतुरस्रस्य अष्टधा विभक्तस्य मध्यगाष्टमभागेन कर्णिका स्यात् ।
कर्णिकाया बहिः परिधिस्थिते । द्वितीयेष्टमभागविन्यासे केसराणि स्युः । केसरबहिः परिधि
स्थिते तृतीयेष्टमभागविन्यासे दलमध्यानि कल्पयित्वा चतुर्थे दलसंधिं विधाय चतुरस्रार्द्ध
स्थिते दलाग्राणि दर्शयेत् । अत्र पाद्यष्टमभागेन तिसृष्वपि विभागशः । विभागेपि भागे सर्वदिक्षु
गेति पर्यः । क्रमेणास्य अस्य निर्णयः । एतच्च पदद्वयं सर्वत्र योजनीयं । अयमर्थः । चतुरस्रांते
वं भागत्रयानिरुद्धत्यानि स्वरूपाणि निरूप्य धाविनम्य मध्यदेशे आंछयित्वा तेषा बहिः चतुर्दि

तु समं तादृ परमप्यष्टमभागं विन्यसेत्। मत्स्यैर्वलांछना परितः षोडशपंचमं चाष्टमभागावधि रेखा
नवलितलः सर्वकिंजल्कोपरि विन्यस्तादेस्वत्र रेखाविन्यस्त्यात् स सूत्रस्य परिमाणात् चतुष्टता
निसंपाद्य वृत्तातिरिक्तरेखाः परिमार्जयेत्। ततः प्रथमवृत्ते कर्णिका द्वितीये केसराणि तृती
ये दलमध्यानि चतुर्थे दलकोट्यः। पंचमे दलाग्राणि लिखेत्। अष्टदलं पूर्वाभिमुखयो निर्मं
पद्मकुंडं उत्तरदिशि कुर्यात्। इदानीमेतदेव कुंडं प्रकारांतरेणोच्यते। वृत्तकुंडसमं चान्यद्
यथान्यप्रकारतः। वृत्तकुंडं पुरा कृत्वा चतुर्थांशमितं भागं त्यजेत्। उत्सेधं च तथा कृत्वा कर्णिका
सार्धकां नवेत्। अपवासिद्धां दलं वेददलमष्टदलं तु वा। यथा प्रतीयाद्विशिष्टं कुंडमपि हि
नाभिसहापि तथैव कृत्वा तन्मध्ये कर्णिकादि पंचविभागं पद्मकुंडं कुर्यादिति। एवं सिद्धं द्वितीयं
पद्मकुंडं ॥७॥ अथवैतद्वितीयतृतीयः प्रकारः उच्यते। पूर्ववृत्तकुंडमेव भ्रामे रचलं मेखलाभ्य
धीतस्य अंतर्गतं चतुर्धा भजेत्। वृत्तकुंडमध्ये अन्यस्यापि समभागस्य वृत्तत्रयस्य करणं चतु
र्धा निचयविभागः कार्य इत्यर्थः। यतः तेन मध्ये सार्धभागद्वयेन विस्तृतकर्णिका विधेया। उत्से ४२
धं च तथा कृत्वेति कर्णिकाया उच्छ्रायमपि सार्धभागेन कृत्वेत्यर्थः। अथ सिद्धेन सार्धभागद्वये

न केसरस्थानं त्रिंशत्स्थानं दलान्यवकुर्यात्। एवं चतुर्दलमष्टदलं वा पद्मकुंडं कुर्यात्। एवं सिद्धं तृती
यं पद्मकुंडं ॥ त्र्यादश भागं भागं चतुर्दिक्षु तदंतरे। विन्यसेत् प्रमाणेन डयांशमपरं न यत्नात्
त्र्यकर्णप्रमाणेन लघुनानाप्यापि लांछयेत्। तत्राष्टसूत्रसंयोगाद्दशकोणकुंडमुच्यते। द्वादशाधा
विभक्तस्य क्षेत्रस्य पातनाद्वादशोऽभागस्तावत् भागं चतुर्दिक्षु विन्यसेत्तदंतरे तस्य क्षेत्रस्य
तरेखाहि। आदेशात् अपतरं प्रदेशो अंतरेखावृद्धि योगात् संस्थानयोरिति। ज्ञापकादंतरशाद्ध्रो
स्वाद्विर्वचनात् प्रमाणेनेति। तस्य बहिर्विन्यस्तद्वादशभागपरिमाणेन अपरं द्वितीयं च
तुर्थांशं चतुरस्रं न यत्नात्। प्रणयेत् कुर्यादिति यावत् तु यह्मि मिति। तायकोन्तप्रमाणेन लघुना त
स्यकर्णप्रमाणेन लघुना कोणात् कोणान् स्पर्शि सत्र शब्दशास्त्रयुक्तं इति प्रसिद्धं। इदंतु तेन
नीहास्य चतुष्कोणगामिनः। प्रयोगे च चत्वारः कर्णाः इत्यन्ति प्रायेण कर्णाश्च मपि कर्णशब्देनोक्ता
तेनायमर्थः। आद्यस्थितचतुरस्रगर्तदशावधिर्यावान् कर्णस्तावत्प्रमाणेन तत्तुल्यासु लस्यक
र्णस्य तुल्यासु लांछयेत्। अत्र बाह्यचतुरस्रस्य त्र्यणेप्य कर्णो मध्यपार्श्वबिंदुनि निरा तुल्या का
रणया तुल्या बाह्येनाप्येति ॥७॥ अथ अष्टाश्रायत्नाधेचतुरस्रसंबंधिन्यकस्मिन् कोणे कोणा

र्धपरिमितस्य सूत्रस्यादिं निधाय तत्सूत्रं चतुरस्ररेखोपरि भ्रामयेत्सूत्राग्रासन्नं तिलांछयेत्। एवं प्र
तिकोणे सूत्रादिं निधाय प्रतिलोम्यानुलोमेन भ्रमणात् तत्स्थाने लांछयेत् प्रतिदिशं लांछनद्वय
करणादिक्चतुष्टये लांछनेषु सूत्राग्रपातनादष्टास्रं कुंडं कुर्यात्। अयमिह निर्माणप्रका
रः। षट्कं चतुरस्रीकृतस्य क्षेत्रस्य बहिः चतुर्दिक्षु द्वादशांगुलविस्तृतस्य परिमाणेन अपरं च
तुरस्रं कुर्यात्। (७)। अथ तद्दीपकरणार्द्धपरिमितस्य सूत्रस्य प्रतिकोणमादिं निधाय चतुरस्र
रेखोपरि भ्रमणात् तत्स्थानेषु लांछयेत् दिक्चतुष्टये लांछनाष्टकं कृत्वा लांछनोपरि सू
त्राष्टकनिपातनादेशानदिशि शिखरवन्निम्नयोनिकमष्टास्रं कुंडं कुर्यात्। एवं सिद्धं। इह तावन्नी
मन्त्रियमन्तरेणैव तत्कर्मणि योगिनां याविज्ञानवजितोपदिष्टं कुंडं दृष्यमुच्यते। सप्तमां
शं बहिर्न्यस्य कृत्वा वृत्तमिह भ्रमात्। चतुर्थभागहस्तेन सर्वक्षेत्रेण सोमिते। धनुर्यावदिति सि
पंचस्रे पंचास्रकुंडं जो। होमश्च शरस्य नेतरशाकिनीयरुनियहा। चतुरस्रस्य क्षेत्रस्य बहिः
प्रदेशे चतुर्दिक्षु क्षेत्रसप्तमांशं विन्यसेत् ततः क्षेत्रगर्भविन्यस्तादेवाग्रस्थितसप्तमांशोपरि ४३
विन्यस्तप्रांतस्पर्शतः परिभ्रमणात् वृत्तं निष्पादयेत्। सर्वक्षेत्रेण निवर्त्तितेऽवृत्तापेक्ष

यात्सर्वक्षेत्रार्द्धेन प्रांतरं चतुरस्रे क्षेत्रमेवोपाते। ततः प्रायमर्थप्रांतरं चतुरस्रस्य यादृशे पति
स्य कार्यं चतुर्थभागन्यूनं कृत्वा प्रमाणं नवतितावतामानेन परिमितं सूत्रं विधाय तादृशानि सू
त्राणि बाह्यवृत्तस्यांतरविन्यस्य सूत्रसंधौ कोणं कुर्यात्। तानि पंच सूत्राणि प्रत्येकमंतरद्व
संस्पृष्टकृत्वात् धनुर्ज्याकृति निधनुराकृतमौर्वीसदृशानि स्युः ततः पंचसूत्रातिरिक्तं सर्वं
परिमृज्य पंचास्रं कुंडं स्यात्। तच्चारुनियतादिहोमे प्रयोज्यं। एवं सिद्धं। द्वादशांशं बहिर्न्यस्य कृ
त्वा वृत्तमिह भ्रमात्। तत्क्षेत्रं चतुर्भागं त्यक्त्वा तद्भागे षडिरिति नाम्नि। सम्यक्सप्तधा विभाज्य तास
मांशं सप्तसमकाले अभिचारोपशांत्यर्थे मेऽकुंडमीतिस्मृतं। इहापि चतुरस्रस्य क्षेत्रस्य
द्वादशभागं चतुर्दिक्षु बहिर्विन्यस्य सर्वं वृत्तं कुर्यात्। अथ सर्वक्षेत्रं चतुर्भागविभक्ते तेषां चतुष्प
ष्टांशस्थानां भागानां मध्ये अष्टात्रिंशत्संख्येन तिः परिमितं सूत्रं कृत्वा तादृशानि सप्त सूत्राणि
वृत्तस्यांतरविन्यस्य समानं कुंडं कुर्यात्। अत्रापि सूत्राणां धनुर्ज्याकारत्वात्सूत्रसंधौ कोणे
निर्माणे सप्तसप्तातिरिक्त परिमार्जनं तेति सर्वे बुधवेदितव्यं। एतत्कुंडं मणिचारदोषोपरा
मनको मेपुत्रयेष्टं। एवं सिद्धं। आर्यविश्वकर्मा। यावन्मात्रः कुंडविस्तारस्तत्कलावस्त्रवालस्या

पिमानं प्रदिष्टं याद्दक्कुंडस्याकृतिः संप्रदिष्टा तादृग्रूपं मेखलायां विदध्यात्। स्थापने सर्वकुंडा
नां ध्वजायः सर्वसिद्धिदः। सर्वेषु चैतेषु योनिमानाद्दर्धांगुलपंचादिसूत्रमतिरिक्तं वा विधाय ध्व
जायः साधनायः। विस्तारे दैर्घ्ये गुणिते स्पष्टा निर्विनकेय घेक परिशिष्यते तद्वाध्वजायः इति।
खाते धिके नवेद्रोगा हीने धेनुधनक्षयः। वक्रकुंडे तु संतापो मरणं छिन्नमेखले। मेखलारहिते शो
कोऽभ्यधिके धनसंक्षयः। नाभिं विना शतानं योनिं कुंडे या मा विनाकृते। अपत्यध्वंसनं योनिकुं
डे पत्रकं चवर्जिते। खाताद्वानेन वेद्रोगा इत्यादिना खातादिलक्षणरहितस्य कुंडस्या निष्ट
फलत्वदर्शनाद्द्वितीयं खातादीनामेव लक्षणमभिधीयते। तद्यथा। मोहेतुत्तररात्रे। चतु
र्विंशतिमं भागमंगुलं परिकल्पयेत्। चतुर्विंशांगुलं हस्तं कुंडानां परिकल्पयेत्। हस्तमात्रं
खनेत्तावद्धं मेखलया सह। मुष्टिमानं शताद्धं मित्यादिना प्रसिद्धेन वसर हस्तो गुलपवहा
रेण होमानुसारात्कुंडमानं युक्तं। इयत्तु खातादिमानकथनार्थं परिभाषा क्रियते। शिको जि
नः कुंडस्येत्यं चतुर्विंशतिधा विभज्य यावान् चतुर्विंशतिधा विभज्य यावान् चतुर्विंशतितमो भाग ४४
स्तावत्परिमाणं मंडलं परिकल्प्य चतुर्विंशत्यांगुलैर्हस्तं परिकल्पयेत्। ततस्तेन हस्तेन परि

मितं सर्वकुंडानां तिर्यक्खातमानं विधाय मेखलासहितस्य खातस्य तेनैव हस्तेन परिमितमर्ध
मानं विदध्यात्। मध्यम मुक्तं। कुंडं जिनांगुलं तिर्यगूर्ध्वं मेखलया सह। जिनांगुलं चतुर्विंशत्यंगु
लं। प्रतिष्ठासारसंग्रहे। पंचत्रिमेखलो नाभ्यवेसंयुक्ता। शोभनं खनेत्। विश्वकर्मणाप्युक्तं। पा
सादखातः करः प्रोक्तो निम्नस्त्वंगुलेन तु। तिस्रांगुलानि पंचदशांगुलानि। तस्य निम्नत्वं
ताभ्यान्वांगुलैरेविविचस्य प्रमाणत्वात् मेखलास्तूय पद्मेन पांगुलः प्रथममेखलया अधःखनु
यो चतुर्विंशत्यंगुलत्वात्। कं गमानमुक्तकालोत्तरे। स्यात् द्वादशांगुलः कंठः सर्वकुंडेषु यां विधि। खा
तमेखलयोरंतराले। अंगुलमानेन कंठो पृथ्वीपरपर्याय ऊर्ध्वं तु। सारसमुच्चये। खाताद्द्वादशां
गुलः कंठस्तद्वाह्ये मेखलाक्रमात्। मेखलालक्षणमुक्तं कामिके। सेत्रार्कांशेन तस्योच्छ्रायः सात द्व
दशांगुलः। मेखलाष्टांगुलोच्छ्राया कुंडाकारा तु मेखला। सर्वासांकर्म मामेखलेकात्र वाध
वानः। सेत्रस्यार्कांशेन द्वादशांशेन कुंडशोहः कंठः द्वादशांगुलः स्यात्। तद्दैर्घ्यं गलकुंडस्य
र्धांशेन मेखलायाः पृथुविस्तारः। तयारतुभागेन। षष्ठभागेन मेखलयाः पादशुद्धयः कार्यः।
पिंगलामापतिलेखा। खाता मेको गुलस्यात्पमेखलानाम्। छिन्निर्नवेत् मेखले कालया हिस्तोन

तसंख्यानत्राभियो।कृतसंख्यापंचसंख्या।उक्तं चाप्यधमे।कुंडांगुल्याद्बहिः कार्या मेखलैकाष्टांगुला।
चतुस्त्रिद्व्यंगुलायतास्तिस्रः सर्वत्र शोभनाः।यदा त्वेकमेखला तदा सा विस्तारोत्सेधाभ्यां षडंगुला।
विधेया।एकषडंगुलोत्सेधः।विस्तारो मेखलायामिति पिंगलोक्तेः।यदा त्रिमेखलात्रयपक्षस्तदा कु
ण्डचतुरार्धांगुलमानात्कर्तव्या।मोद्भूत्तरा मेखलात्रितयं कार्यं कोणरामपंचांगुलैः।कोणाश्च
त्वारः रामास्त्रयः।यमौ द्वौ।तत्र सर्वातिमामांगुला मध्यमा त्र्यंगुला कुंडकंठसहिता।चतुरंगु
लेति।सत्येवं प्रथममेखलायाः कुंडकंठाद्वारभ्य नवांगुलोत्सेधः स्यात् लक्षणसंग्रहेपि।प्रथ
माष्टांगुला व्यासा कुंडतासानवांगुलैः।मध्या तु त्र्यंगुला ज्ञेया तृतीया द्व्यंगुला।मेखलाः पंच
वा कार्याः तद्यथा त्रिपञ्चके।प्रथमा कुंडसंनिहिता आंतरोत्सेधनवांगुला।बाह्ये चतुरं
गुले वा।अष्टांगुला चतुरंगुला।अष्टय चत्वारः पक्षौ द्वौ।योनिलक्षणमुक्तं सर्वत्र शुभा।मेखला
मध्यतो योनिः कुंडार्धत्रिंशद्विस्तृता।अष्टांगुलमानोष्ठकं तत्कार्या अश्वत्थदलाकृतिः।प्राग
ग्नियाम्यकुंडानां प्राक्कार्या योनिरुदङ्मुखा।पूर्वमुख्याः स्मृताः शेषा यथायोगं समन्विता।मेख ४५
लायामर्ध्वदेशे कुंडार्धदीर्घा कुंडतृतीयांशविस्तृता योनिः कार्या।अन्ये त्वाहुः नयोन्यप्रमु

खतो कुंडराश्मेन योनिमेखला।अंगुष्ठराज्ञोंगुलसम्मितमिति पिंगलोक्तेः।नारदीये।कुंडस्यांश
प्रविस्तारा योनिर्द्व्युपतांगुला।कुंडार्धेन तु दीर्घा स्यात् कुंडेष्टौ बोधिपत्रवत्।कुंडेष्टौ तिर्यग्या
कुंडे द्वादशांशेनोच्छ्रितं एव योनेरपि द्वादशांशेनोर्ध्वः कार्यस्तथा।यथा कुंडे प्रविहितं तु स्व
यस्याहत्ति बोधिपत्रमध्यपत्रं चोभयपार्श्वदैर्घ्यं सर्वांगुल्यानानि त्रिरेखा विस्तरेण त्र्यंगुला
गुलोच्छ्रिता मध्यप्रविष्टा स्यात्तरेखया।कुंडमध्ययसमायुक्ता वा घटदलवन्मता।अंगुष्ठमेखला
युक्ता मध्ये त्वास्यधृतिस्तथा।दृष्टस्ताहर्ष यामेत्र जलस्थापत्रिमोत्तरे।नवमस्याप्युक्तं कुंडस्य योनि
र्द्वितलक्षिता।सर्वांगुला द्वादशांगुला दैर्घ्येण।अंशेनेतरतीयांशस्पृष्टविस्तारो एकेनांगु
लेनोच्छ्रिता नयाएकेनांगुलेन कुंडमध्ये प्रविष्टा।कुंडमध्ययसमायुक्तेति स्रुवोक्तां शेषकुंडस्य
तुल्याकृतेर्योनिर्बुध्नप्रदेशाच्छितं कृतमध्यमेव गजकुंभाकृतिर्वा।कुंडस्याहीनोक्तिः।तेनात्र कुंडस्य स्वला
स्कृतिमृप्सि:ध्ययं घटद्वयं वा स्थाप्यमिति भावः।अंगुष्ठमेखलायुक्तेति।एकांगुलमानया मेखल
या परिवेष्टितेत्यर्थः।मध्ये त्विति यथाद्यविधिना धारणापरिविंश किंचित्तोतयायोनिमध्ये पिवि
लं कर्तव्यमित्यभिप्रायः।दृष्टस्वलेति स्वाग्नियाम्यकुंडेषु दक्षिणभागे उत्तराभिमुख योनिः

कार्यानिर्ऋत्यादिकुंडेषु पश्चिमभागो मार्ग्यमुखविधेया।नवमइति।अष्टादिक्षुकुंडाष्टकंविधाय
सर्वशानादिशोरंतरालेयन्नवमंकुंडंचतुरस्रंवाकुंडंवाकुंडचतुष्टयंकृत्वाईशानदिशिपद्मंनवमं
कुंडंतयोरपिदक्षिणभागेपियोनिःकार्येत्यर्थः॥ ॥इतिश्रीनैकामश्वराल्यएकायरुचामुंडा
जविरचितेसर्वमंत्रसाधारणेकल्पचिंतामणौमंडपकुंडलक्षणनिरूपणंनामात्रयोदशःप्रकाशः
॥१३॥ ॥अथाग्निजननंतदुक्तंशारदातिलके।ततोग्निजननंकुर्यात्स्वस्वतंत्रानुसारतः।आ
र्धःकुंडेविधिवत्संस्कृतेशास्त्रवर्त्मना।अष्टादशास्यसंस्काराःकुंडानांतत्रचोदिताः।वीक्षणं
मूलमंत्रेणप्रोक्षणमस्त्रतो।तेनैवताडनंदर्भैर्वर्मणाभ्युक्षणंमतं।अस्त्रेणखननोद्धारौहृन्मंत्रेणप्रपू
रणं।समीकरणमस्त्रेणसेचनंवर्मणामतं।कुट्टनंहेतिमंत्रेणसर्वमंत्रेणमार्जनं।विलेपनंकलारू
पकल्पनंतदनंतरं।त्रिसूत्रीकरणंपश्चाद्धृदयेनार्चनंमतं।अस्त्रेणवज्रीकरणंहृन्मंत्रेणकु
शैःकुशैः।चतुःपथंतनुत्रेणतनुपादक्षपाटनं।योगेकुंडानिसंस्कुर्यात्संस्कारैरेभिरीरितैः।
अथवातानिसंस्कुर्यात्चतुर्भिर्वीक्षणादिभिः।तिस्रःतिस्रोलिखेद्रेखाःप्रागग्राउदगग्रगाः॥ ४५
प्राग्याग्रांस्मृतादेवामुकुंदेशपुरंदराः।रेखाणामुदगग्राणांब्रह्मवैवस्वतेंदवः।अथवाप्रक्षेण

वृत्तत्रिकोणंतत्रसंलिखेत्।सर्वाण्यप्युत्तमानारोगयोगपीठमथार्चयेत्।वागीश्वरीमृतुस्नातांनि
लेंदीवरसन्निभां।वागीश्वरेणसंयुक्तांउपचारैःप्रपूजयेत्।सूर्यकांतादिसंभूतंयद्वाश्रोत्रिय
गेहजं।आनीयवह्निपात्रेणक्रव्यादांशंपरित्यजेत्।संस्कुर्यात्तंयथान्यायंदेशिकोवीक्षणादि
भिः।उद्बीर्यद्वाग्निभ्यांनामस्पेफंस्मरन्वसोः।योजयेद्वह्निबीजेनचैतन्यंपावकेनदा।तारेणाभिमं
त्रितंमंत्रीधेनुमुद्रामृतीकृतं।अस्त्रेणरक्षितंपश्चात्तनुत्रेणावगुंठितं।अर्चितंत्रिःपरिभ्राम्यकुं
डस्योपरिदेशिकः।प्रदक्षिणंतदातारमंत्रोच्चारणपूर्वकं।आत्मनोभिमुखंवह्निंजानुस्पृष्ट
महीतलः।शिवबीजधियादेव्यायोनावेनंविनिक्षिपेत्।पश्चाद्देवंप्रदेयाच्चतद्याहृदाचमनीयकं।
चालयेन्मनुनानेनतमग्निमथदेशिकः।चित्पिंगलहनहनदहदहपचपचसर्वज्ञाज्ञापयस्वाहा।
चित्पिंगलहनदहपचयुग्मानुदीर्य च।सर्वज्ञाज्ञापयस्वाहामंत्रोयंसमुदीरितः।अग्निंप्रज्वालि
तंवंदेजातवेदंहुताशनं।सुवर्णवर्णममलंसमिद्धंविश्वतोमुखं।उपतिष्ठेततोवह्निंमनुनाने
नपावकं।चित्स्वरूपात्मकेदेहेमंत्रेजिह्वाःसविंदुकाः।लिंगेपायुशिरःसुघ्राणनेत्रेषुसर्वतः।वह्नि
राधेशसंयुक्तासादियांतःसबिंदवः।वर्णमात्रासमुद्दिष्टाजिह्वानांसप्तदेशिकैः।योगरत्नावल्यां॥

हिरण्यावर्णा लक्ष्याः स्तंभने चूँ गगनानसिः । रक्ताः शैलापने कृष्णा कूमारे श्रूं व सुप्रभा । पुष्टौ धूम
लिरक्ता स्यात् उच्चाटे धूम्रविग्रहः । मध्ये श्रुंबकु रूपोच्चनैका सा गुत्तरे स्थिता । रुधें रागीति वाशी
र दिक्षु रोवान्यथा क्रमं । इष्टकाम्यविभेदेन जिव्हा समुद्विर्नुतः । जिव्हा वीजानि सम्राग्ने रं सौव
र्णौ रवर्जितौ । रेफषष्ठस्वरारूढौ चंद्रबिंदुशिरान्वितौ । यथा । श्रूं रूं ब्रूं सूं धूं स्रूं कूं इति । शारदा
तिलके । जिव्हास्ता त्रिविधाः प्रोक्ता गुणभेदेन कर्मसु । हिरण्या गगना रक्ता कृष्णा न्या सुप्र
रूपा वि भामला । बहुरूपातिरक्ता च साधको याग कर्मसु । राजस्यो रसना वह्नेर्विहिताः काम्यकर्मसु । विश्वम
र्तिः स्फुलिंगिन्यो धूम्रवर्णा मनोजवा । लोहिता न्याकराले च काली तामस ईरिताः । एताः सप्त
नियुज्यते क्रूरकर्मसु मंत्रिभिः । स्वस्वनामसमानासु जिव्हाः कल्याणरेतसः । अमर्त्याः पितृ
गंधर्वयक्षनागपिशाचकाः । राक्षसाः सप्तजिव्हानां ईरिता अधिदेवताः । वह्नेरंग मनून् न्यसे
त् तास्तां युक्तेन वर्त्मना । सहस्रार्चिः स्वस्तिपूर्णः उत्तिष्ठ पुरुषः पुनः । धूमव्यापी सप्तजिव्हो धनु
र्धरः लिकमात् । षडंगमनवः प्रोक्ता जातिभिः सहस्रंयुताः । मूर्ति रष्टौ ततो न्यसेत् देशिको जात ७
वेदसः । मूर्धास्य पार्श्वकपृष्ठधु कटिपार्श्व भाकेषुच । आदहि एववरा न्यसेदुच्चैस्तेताय यथाक्रमं । जात

वेदाः सप्तजिव्हो हव्यवाहन सांक्षिकः । अश्वोदरज संज्ञो न्यः पुनर्वैश्वानराह्वयः । कौमारतेजास्ता
द्विश्वमुखो देवमुखस्मृतः । ताराग्न्यपदाद्यासु नमोंता स्तावत्क्रिमूर्त्तयः । आसनं कल्पयेत्ता
ग्नेर्मूर्त्तिमस्य विचिंतयेत् । इष्टं शक्तिं स्वस्तिका भितिमुख्यैः दीर्घैर्दोर्भि र्धारयंतं जपाभं । हेमा
कल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः । परिषिंचेत्ततस्तोयैर्विह्नेर्मेखलो
परि । दर्भैरग्नेर्मध्ये मेखलायां परितस्तरेत् । निक्षिपेत् दिक्षु परीधान् प्राची वर्जं गुरुत्तमः ।
प्रादक्षिण्येन संहृत्य तास्ते तु ब्रह्मादिमूर्त्तयः । पालवह्निर्यजेन्मध्ये गंधाद्यैर्मनुना मुनावै
श्वानरजातवेद पदं पश्चाद्धि हावह । लोहिताक्षपदस्यांते सर्वकर्माणि साधय । वह्निजा
या विधिः प्रोक्तो मंत्रः पावकवृत्तकः । मध्ये षडस्रपि कोणेषु जिव्हा स्वाजारूचोयजेत् । केस
रेषु क्रमार्गेण पूजयेदंगदेवताः । दलेषु पूजयेन्मूर्तिः शक्तिस्वस्तिकधारिणी । लोकपाला
स्तती दिक्षु पूजयेद्रुक्क सतत्त्वाणान् । पश्चाद्दात्रयपाणिभ्यां स्रुक्स्रुचौ लद्धो मुखौ । त्रिः श्र
प्रतापयेद् क्रोध द्विनाद्मय देशिकः । तदग्रमध्यमूलानि शोधयेत्तैर्यथाक्रमात् । गृहीत्वा
वामहस्तेन प्रोक्षयेद्दक्षिणेन तौ । पुनः प्रताप्यतौ पक्षि दर्भैर्निग्रंथौ विनिक्षिपेत् । आत्मनोद

दक्षिणे भागे स्थापयेत्तौ कुशास्तरे । आज्यस्थालीं समादाय प्रोक्षयेदस्त्रवारिणा । तस्यामाज्यं विनिक्षि
प्य संस्कृतं वीक्षणादिभिः । निरुक्षायैवं गारान्रुद्राग्ने पुनिवेशयेत् । इदं तापनमुद्दिष्टं देशिकैस्त
त्ववेदिभिः । संदीप्य दर्भयुगलं आज्ये क्षिप्त्वानले क्षिपेत् । गुरुर्हृदयमन्त्रेण पवित्रीकरणं त्विदं ।
दीप्तेन दर्भयुग्मेन निराज्याज्यं सवर्मणा । अग्नौ विसर्जयेद्दर्भमभिद्योतनमीरितं । घृतेन ज्वलिता
न्दर्भान्प्रदर्श्याज्ये पुनर्गुरुः । जातवेदसि तान्प्रस्य द्योतनमितं मतं । गृहीत्वा घृतमंगारा
न्प्रसूप्याग्नौ जले क्षिपेत् । अंगुष्ठोपकनिष्ठाभ्यां दर्भौ प्रादेशसंमितौ । धृत्वोत्पुनीयादस्त्रेण
घृतमुत्पवनं त्विदं । तद्धृदयमन्त्रेण कुशाभ्यामाज्यसंमुखं । अग्ने संप्लवनं कुर्यात्संस्काराः षडमी
रिताः । प्रादेशमात्रं संग्राह्य दर्भयुग्मं घृतान्तरे । निक्षिप्य भागौ द्वौ कृत्वा पत्रोष्ठकेन रौ स्मरेत् ।
वामे नाडीमिडां भागे दक्षिणे पिंगलां पुनः । सुषुम्नां मध्यतो ध्यात्वा कुर्याद्धोमं यथाविधिः ।
स्त्रुवेण दक्षिणाज्यभागादादायाज्यं हृदा गुरुः । जुहुयादग्नये स्वाहेत्यग्नेर्दक्षिणलोचने । वामत
स्तद्वदादाय वामे वह्नेर्विलोचने । जुहुयात्सोमाय स्वाहेति हृदयेणाणुना । मध्यादाज्यं समादा ४८
य वह्नेर्भालविलोचने । जुहुयादग्नीषोमाभ्यां स्वाहेति हृदयाणुना । हृन्मन्त्रेण स्रुवेणाज्यं तस्मा

दादाय दक्षिणात् । जुहुयादग्नये स्विष्टकृते स्वाहेति तन्मुखे । स्वाहेति संपातमेकांगेष्वा
ज्यान्वा कुलीः क्रमात् । इत्यग्निनेत्रवक्त्राणां कुर्यादुद्घाटनं गुरुः । समारान्निर्वाह्य तन्निराज्येन जुहु
यात्पुनः । जुहुयादग्निमन्त्रेण आचार्यो देशिकोत्तमः । गर्भाधानादिका वह्नेः क्रिया निर्वर्तयेत्क्रमात् ।
अष्टानिराज्याहुतिभिः प्रणवेन पृथक्पृथक् । गर्भाधानं पुंसवनं सीमन्तोन्नयनं पुनः । अनन्तरं जात
कर्माख्यं नामकरणं तथा । उपनिःक्रमणं प्राशनं अन्नप्राशनमीरितं । चौलोपनयने भूयो महानाम्न्यं महा
व्रतं तथोपनिषद्गस्त्रा गोदानं च विवाहको विधिः । कुर्वन्तु सुविवाहांताः क्रियास्ताः क्रूरकर्मसु । मरणांताः
समुद्दिश्य वह्नेस्तामवेदिभिः । ततस्त्वपितरौ तस्य संहृत्यात्मनि योजयेत् । समिधः पंच जुहुयात्स
ताग्रघृतसंप्लुताः । मन्त्रैर्जिह्वांगमूर्तीनां क्रमाद्वह्नेर्यथाविधि । सप्त जुहुयादेकमाहुतीनां च
त्वितमः । अवदाय स्रुवेणाज्यं चतुर्थं विधायतां । स्रुवेण तिष्ठेत्तेवाग्नौ देशिकोयतमान
सः । जुहुयाद्वह्निमन्त्रेण वौषडंतेन संपदे । विघ्नेश्वरस्य मन्त्रेण जुहुयाद्दाहुतीर्दश । वि
लोक्य स्विष्टदृष्ट्या तत्रैवं पंचकृत्योनुजात् गुरुरात्मनि संयोज्य कुर्याद्धि ध्यानं विशोधनं । अपरस्या
सामान्यं सर्वतंत्राणां मेतदग्निमुखं स्मृतं । ततः पीठं समभ्यर्च्य देवतायाः कृताशनो ऽ

त्येवह्निरूपाणां देवतामिष्टदायिनां। तन्मुखे तु कुर्याद्वै पंचविंशतिसंख्यया। आम्येन मूल
मंत्रेण कर्तव्यं करणं त्विदं। वह्निदेवतयोरैक्यमात्मना सह भावयेत्। मूलमंत्रेण जुहुयाद्वा आ
म्येनैकादशाहुतिः। नाडीसंधानमुद्दिष्टं येन तदागमवेदिभिः। जुहुयाद्गणमुख्यानां मातृणां ना
मनुक्रमात्। एकैकामाहुतिं तस्य सर्पिषा देशिकोत्तमः। ततोऽन्येष्टपिंडेषु संस्कृतेषु य
थाविधिः। आचार्यो विहरेदग्निं स्रुवादिषु समाहितः॥ इत्यग्निजननविधानं। ततोऽर्चनेऽर्क
यंत्। ततो गणेशाद्यां बलिं निवेदयेत्। ततोऽग्निविसर्जनं॥ ॥इति श्रीनैगमस्ताने पंचा
ग्निजननं नाम चतुर्दशः प्रकाशः॥१४॥ ॥अथ हविर्द्रव्यनिरूपणं। तदुक्तं मोहनोत्तरे।
स्नानकांडे॥ होमद्रव्यप्रमाणं तु वक्ष्यते तु विशेषतः। कर्षमात्रं घृतं होमे शुक्तिमात्रं पयस्मृ
तं। दधिप्रसृतिमात्रं स्यात् लाजास्तु मुष्टिसंमिताः। पृथुकाः सत्यमाणास्तु सक्तवोऽपि त
थोदिताः। गुडं पलार्द्धमानं स्यात् शर्करा तत्समा स्मृता। ग्रासार्द्धं चरुमानं स्यादिक्षुपर्वावि
धिस्मृतः। एकैकं पत्रपुष्पाणि तथा हस्तानि कल्पयेत्। कदलीफलनारिंगफलान्येकैकशो ४६
विदुः। मातुलिंगं चतुःखंडं पनसं दशधा फलं। आम्रधात्रीनालिकेराणि खंडितानि विदुर्बुधाः।

त्रिधा फलं फलं बिल्वं कपित्थं खंडितं द्विधा। उर्वारुकफलं होमे चोदितं खंडितं द्विधा। अन्यान्य
पि च सर्वाणि खंडितानि प्रकारयेत्। दूर्वात्रयं समुद्दिष्टं समिधः स्युर्दशांगुलाः। व्रीहयो मुष्टि
मात्रास्तु गंडुची चतुरंगुला। श्यामाकं मुद्गमाषाश्च कोद्रवा मुष्टिसंमिताः। गोधूमाश्च यवा
श्चैव कल्माषाः फलनास्तथा। ज्ञेया मुष्टिमिता नित्यं तिलाः स्रुवकसंमिताः। शुक्तिप्रमाणं
लवणं मरिचान्यपि विंशतिः। पुरः करमानं स्यात् रामठं तत्समं स्मृतं। चंदनागरुकर्पूरक
स्तूरीकुंकुमानि च। तिंतिणीबीजमानानि समुद्दिष्टानि देशिकैः। कुंकुमं मृगमदं चंदनं
घनसारश्च एकमात्रास्तु। ग्रंथांतरे। बीजान्यन्यानि सर्वाणि बीजमात्राणि देशिकैः।
तकर्षपरिशिष्टो। ॥अथायुधः सधूमे तु जुहुयात्स्याद्यो कुलाशने। यजमानो न वै वृद्धः स
पुत्ररतिप्रकृतिः। छंदोगपरिशिष्टे कात्यायनः। पाणिपाकुतिर्बुद्ध्या पर्वहस्तकरा हिता
चेत्स्रुचि पर्वहस्तिना। देवेन तीर्थेन च हूयते हविः स्वांगारिणि स्वर्चिषि तच्च पावके। योऽ
नर्चिषि जुहोत्यग्नौ व्यंगारिणि च मानवः। मंदाग्निरामयावी च दरिद्रश्चैव जायते। तस्मा
त्समिद्धे होतव्यं नासमिद्धे कदाचन। आरोग्यमिच्छतायुश्च श्रियमात्यांतिकीं तथा। जुहु

हुत्वाकृतेचैवपाणिःसर्पिःस्रुवादिभिः। नकुर्यादग्निधमनंकुर्याद्वाव्यजनादिना। मुखेनैवधमेद
ग्निंमुखाद्ध्येषोऽजायत। नाग्निंमुखेनेतितुयल्लौकिकेयोजयन्तितत्। भविष्यपुराणे। नमोक्षि
तेनपात्रेणहस्तेस्वेनचपाणिना। वामेनयत्कुशाद्यैश्चनाग्निरिन्धेतकृत्यते। धनायुर्वीर्यरोगायु
सोमनार्थंसुमध्यमं। ताजादिहवनेतेनकर्त्तव्यंवपनंतथा। वपनंप्रोक्ष्यादिनिर्माणः। वायुपुरा
णे। कंडनंपचनंचैवनथैवाध्वेरवनंसदा। सह्रदेवपितृणांस्यात्तदेवानांचत्रिरूच्यते। मरी
चिःप्रागग्राःसमिधोग्राह्याःस्ववर्णाहपाटिताः। काम्येषुवशकर्मादौविपरीताजिघां
सतः। विशीर्णाविदलाह्रस्वावक्रावक्रुशिराःकृशा। दीर्घास्थूलाघुणैर्जुष्टाकर्मसिद्धिविनाश
काः। साग्निहोत्रिनुकृतौ। ब्रह्मपुराणे। शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवाः। अश्वत्थोदुम्बरौ
बिल्वश्चंदनसरलास्तथा। शालाश्चदेवदारुश्चखदिरश्चेतियाज्ञिकाः। छंदोगपरिशिष्टेका
त्यायनः। नांगुष्ठाधिकाकार्याशमित्स्थूलतयाक्वचित्। नवियुक्तात्वचाचैवनसकीटानपा
टिता। प्रादेशान्नाधिकानोनातथास्याद्विशाखिका। नसपर्णासमित्कार्याहोमकर्मसुजा ५०
नता। तथा। यथोक्तवस्त्वसम्पत्तौग्राह्यंतदनुकारियत्। यवानामिवगोधूमाव्रीहीणामिवशालयः।

-आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते। विष्णुधर्मोत्तरे। दध्यलाभेपयःकार्यंमध्वलाभेतथा
गुडः। घृतप्रतिनिधिंकुर्यात्सर्वालाभेयवः। प्रतिनिधिर्नवतिपैठीनसिः। यवपरिशिष्टे। द्रव्या
भावेकाशःप्रतिनिधिः। स्वयंधर्मः। पलाशाभावेखदिरोरोहितकोडुंबराणांतदलाभेसर्वेषांवनस्प
तीनांनिर्कलेनीफकनीवराजवृक्षशाल्मल्यारलुकपित्थकोविदारबिभीतकश्लेष्मांतक
सर्वकंटकाश्चवर्ज्या। घृतमन्यार्थंप्रतिनिधिस्तदभावेदधिपयोवा। इति। स्मृत्यर्थसारे। होमे
मुख्योयजमानःपत्नीपुत्रश्चकन्यकाः। ऋत्विक्शिष्योगुरुर्भ्राताभागिनेयःसुतापतिः।
एतैरेवहुतंयत्तुतद्धुतंस्वयमेवतु। ग्रंथांतरे। शिवार्चनरतानित्यंजपहोमादिकर्मसु।
वैश्वदेवोबलिदानंसर्वतर्णंछयविधिः। स्मृत्यर्थसारात्। बहुणुष्कंधनेचाग्नौसुसमि
द्धेविधूमिके। सागरेलेलिहानेचहोतव्यंनान्यथाक्वचित्। मोहनोतरे। वैश्वानरंत्रिसंध्यां
वैरणधयेदेशिकोत्तमः। सायाह्नेआज्यहोमेचअन्यद्रव्याणिस्तणे। वह्निहोमेतुसंगृह्य
नमूर्धिनवनासिके। मूर्धिहोमेभवेद्व्याधिर्नेत्रेंधत्वमवाप्नुयात्। नासिकायामनर्थाडाम
त्लकेधनसंक्षयः। सधूमंफलमित्याहुःसकृच्चालाचनासिका। धूमश्चाल्पाचनेत्रंस

ज्वलितं मुखं स्मृतं। कनकसिंदूरबालार्ककुंकुमक्षौद्रसन्निभः। सुवर्णरेतसो वर्णः शोभनः परि
कीर्तितः। भेरीवादित्रहस्तींद्रध्वनिर्वह्निस्तु नावहः। नागचंपकपुन्नागपाटलायूथिकानिभः।
पावकस्य तु यो गंधो हितः स्पोदेशिकोत्तमैः। प्रदक्षिणशिखावह्नेः शुभा ज्ञेया कृतिक्रमे।
कुंदेंदुधवलो धूमो वह्नेर्मोक्षः शुभावहः। कृष्णवर्णो नवे धूमो यजमानं निहंति वै। चेन्नोत
प्राणिहंसानः पापापनसमस्तथा। खरस्वरो यदा वह्निः सर्वकार्यं निहंति तत्। प्रतिबद्धा कु
लं नुज्योतुः खद्योदेशिकस्य च। छिन्नवृत्ता शिखा कुर्यान्मृत्युं धनपरीक्षयं। शुक्लापद्मानि
ज्यो धूमो पापापतनसमप्रभः। हानि सुरगजालीनां गवादीनां विशेषतः। एवं विधेषु दोषेषु
प्रायश्चित्तं यदेशिकः। मूलेनास्येन जुहुयात्तेन शांतिर्न विप्पति। ब्राह्मणान्भोजयेत्त
स्माद्दक्षिणां शक्तितः संख्यया। एवं कृते तु सर्वविघातहेतुर्दुःखनिवारणं। ततः काम्यं प्रवक्षत
मनसा यथा भाषितं। होममुद्रात्रयं प्रोक्तं मृगीहंसी च सूकरी। शांतिके च मृगी ज्ञेया हंसी पौष्टि ५१
ककर्मणि। सूकरी चाभिचारे तु कुर्यान्मंत्रविदुत्तमः। सूकरी करसंकोचा हंसी मुक्तकनिष्ठिका।
मुक्तकनिष्ठा लज्जा मृगी मुद्रा प्रकीर्तिता। अथ याभेरात्रा पुष्पपौष्टिके कंस्यानि मृगीहंसय

कीर्तिता। अभिचारादिकेषु मे सूकरी कथिता बुधैः। सूकरी पुत्रकामाय धनकामाय हंसिनि। मृ
गी मोक्षप्रकर्तव्या आकृतौ सर्वकामिषु। क्रूरं यन्मुद्रया युक्तं सर्वं निःफलं भवेत्। अमृतार्थसमा।
पयो दधि यवाश्च सर्पिरोदनतंडुलाः। होमे यासनं यातेषु प्रशस्तानि द्विपो वृत्तु। शान्तिः शा
माक निवारा व्रीहिगोधूमयावकाः। एतेषां तं कुलाहोम्या पौष्टिका सामि पंगवो। प्रियंगवः श्यामं
श्यामा गोधूममाषाश्च यवाः। स्वरूपेणैव होमास्तु स्वरूपेणैव वै तिलाः। इक्षुरूपेण होतव्यं पा
णिनाकनिकं कविः। व्रीहिणावापवानो वाशलमाकृतिरीष्यते। तंदुला द्विगुणं मासोमधूरा
उरुतिस्तथा। कुकुटांडप्रमाणं तु पिंडस्य विधीयते। अंगुष्ठपर्वमात्रं स्यादेवदानवतोपि
चामोहनोत्तरे दानवेंद्रे। दूर्वाश्च योच्छ समिधो गोघृतेन परिप्लुताः। होतव्याः शांतिके देवि वृ
द्धिर्येन स्फुटान वेत्। समिधो राजवृक्षोत्थाः होतव्याः स्तंभकर्मणि। मेषाघृतेन संयुक्ता सह
देवस्य सिद्धिदा। मादिरी मारणे प्रोक्ता कटुतैलेन संयुता। होतव्या साधकेंद्रेण मारणे साम
धो मत। उच्चाटने तु तत्पृष्टोत्थाः तिलजा तैलेन संयुता। उच्चाटयति महीपालाः शशैलवनकाननं।
अवशपं वशपद्धेद्वेष्ये निंबदाडिमीकुसुमं भवेत्। अजाघृतेन देवेशि वशाय सचराचरं। विद्वेषे

वेधकर्त्तव्या उन्मत्तसमिधोमना। अलसीतैलसंयुक्ता विद्वेषणकरं परं। अयुतं चक्रनिर्दग्धा त्रयु
गुलं च घृतप्लुतं। वशमायान्ति ताः सर्वाः कन्यानागांगनादयः। जातिनिर्मल्लिकान्निर्वाणी घृतेन परि
प्लुता। सिद्धपातिकन्यकाः सर्वाः साधकाग्रे पतंति च। करवीरैस्तु रक्तैस्तु योषितो वशमानयेत्। ---
कृतो होमो अर्थलाभकरो भवेत्। पिचुमंदैः कृतो होमो मानिमान् जायते नरः। क --- होमेन राष्ट्र
सिद्धिर्विधानतः। अर्कपुष्पैः सदारोग्यं मंदारै रर्थसंपदः। तथैव पाटलीपुष्पैः गौरिकर्णिस्तथैव च।
नीलपुष्पैः कृतो होमो वशं पशूनानयेत्। ब्राह्मणास्तु नश्यंति पुष्पैस्तु बिल्वसंभवैः। कदंब
पुष्पहोमेन यक्षिणी वशमानयेत्। सौभाग्यं कुंदपुष्पैस्तु वशं परं क्षोभं लभेत्तथा। रक्तचंदनपत्रै
श्च चक्रवर्त्तित्वमश्नुते। अशोकपुष्पहोमेन सर्वशोकनिवारणं। कर्णिकापुष्पहोमेन प्रज्ञावृद्धिम
वाप्नुयात्। किंशुकैः सदारोग्यं आधिनाशो विधीयते। आम्रैस्तु चिंतितं कार्यं रसं जंबूफलैस्तथा।
कपित्थफलहोमेन रूपसिद्धिमवाप्नुयात्। जंबीरफलहोमेन यशः प्राप्नोति निर्मलं। पनसैः प्रा
प्यते राज्यं आयुरश्वत्थजैः फलैः। न्यग्रोधफलहोमेन सर्वसंपदमाप्नुयात्। दाडिमीफलहोमेन ५२
रत्नसिद्धिमवाप्नुयात्। पिचुमंदफलैः पुष्पैर्विद्वेषणकरं परं। द्राक्षाफलैः सदारोग्यं चिंतितं फलं लभेत्।

नालिकेरफलैर्होमं दैवीं सिद्धिमवाप्नुयात्। खर्जूरफलहोमेन राक्षसी वशमानयेत्। कुष्मांडफलहोमे
न वेतालीसिद्धिमाप्नुयात्। चंपकैस्तु कृतो होमो सिध्यत्यप्सरसां गणः। तिलैस्तु शांतिकं कुर्यान्मधुत्रित
यसंयुतैः। राजिकालवणेनैव वशः पाकृतो स्वद्योकिकी। शालतालकहोमेन मारयेत् रिपुं क्षणं। बि
ल्वाम्लहोमेन शत्रुतुल्यो भवेन्नरः। प्रियंगुकदलीपुष्पैः सर्वसत्ववशं नयेत्। दूर्वाभिस्तिलैर्होमे
मधुत्रितयसंयुते। रोगविनाशायेत्सद्यः कालमृत्युभयादपि। गोरोचनावल्मां। स्तंभनाकर्षणवशो
च्चाटशांतिमारयेद्यथाक्रमं। पीतनीलारुणधूम्रश्वेतकृष्णं समस्तनक्षो। नक्षत्रमस्य होमे स्यात्तत्
द्गुणयोगतः। ज्वरनाशो तिलैः सदा पुष्ट्युच्चाटं मोहनं क्रमात्। भोचोक्तं रसरत्नाकरमंत्रखंडे।
जपस्य तु दशांशेन होमः कार्यो दिने दिने। अथवा लक्षपर्यंतं होमः कार्यो विपश्चिता। गवां क्षीरा
ज्यमधुभिर्वश्यपौष्टिककर्मणि। त्रिकोणे कुंडके वायव्याभिमुखो भवेत्। लवणैकेन वाका
र्यस्तिर्यग्वोदङ्मुखोस्थितः। कार्यो समस्तु तत्काले तयापारंगवी जके। विद्वेषे तु कुर्यान्मंत्री रा
क्षसाग्निं नलः। उदुंबरकंटकवृक्षस्य बीजैर्घृतप्लुतैः। उच्चाटने मरुत्कुंडे तु कुर्यात् पावकाननः।
अजासर्पिः सिक्तारं बीजं कर्पाससंनवं। द्रावाक्षिनरमांससर्पमाधारामनखास्तथा। अथो

त्तरसहस्रंतुवन्हिकुंडेनवा।छिन्नेभ्रामिणास्यस्तुपंचलंनुकुर्यान्मारयेद्रिपुं।अथवायत्रयत्रमंत्रो
कमंत्रस्यासिद्धये।तथाहोमःप्रकर्तव्यःशास्त्रदृष्टेनवर्त्मना।तत्रपिलायकृत्वायजनस्त्वाध्यात्वाथ
देवता।सर्वसिद्धिमवाप्नोतिनात्रकार्याविचारणा॥ ॥इतिश्रीनैगमज्ञातीयकायस्थचामुंडरा
जविरचितेआगमसारोद्धारेसर्वमंत्रसाधारणेकल्पचिंतामणौकुविद्यानिरूपणंनामपंच
दशःप्रकाशः॥१५॥ ॥श्रीः॥ ॥संपूर्णः॥समाप्तं॥ ॥संवत १७९९ वर्षेशाके १६६५ वर्षे
पौषमासेकृष्णपक्षे१०शनिवासरेलिखितोयंग्रंथः।पं॰श्रीराजगढीनेत्रानंदनंदनवत्तु।श्रीरस्तु।
यादृशंपुस्तकेदृष्ट्वातादृशंलिखितंमया।यदिशुद्धमशुद्धंवाममदोषोनदीयते॥१॥ ॥ ॥